कृपया यह ग्रन्थ नीचे निर्देशित तिथि के पूर्व अथवा उक्त तिथि तक वापस कर दें। विलम्ब से लौटाने पर प्रतिदिन दस पैसे विलम्ब शुल्क देना होगा।

अनिवार्य संस्कृत व्याकरण

२२१६

...संख्या १५   ॐ

अनिवार्य द्वितीय प्रश्न-पत्र

पूर्व मध्यमा, प्रथम वर्ष

लेखक :

गणेश प्रसाद शुक्ल

प्रकाशक :

रानी प्रकाशन मन्दिर,

हाथरस।

अनिवार्य संस्कृत व्याकरण

(क) मध्य कौमुदी (प्रारम्भ से अव्यय प्रकरण तक)

अथवा

भट्टि काव्य–१ ४ सर्ग

अथवा

व्याकरणच्छात्राणां कृते

तर्क संग्रहः

(सपदकृत्य प्रत्यक्ष खण्ड)

अक्–अ, इ, उ; ऋ, लृ ।

अच्—अ, इ, उ, ऋ, लृ, ए, ओ; ऐ, औ ।

अण्—अ, इ, उ, ।

अट्—अ, इ, उ, ऋ, लृ, ए, ओ, ऐं, औ, ह, य, व, र ।

अण्–अ, इ, उ, ऋ, लृ, ए, ओ, ऐ, औ, ह, य, व, र, ल, ।

अम्–अ, इ, उ, ऋ, लृ, ए, ओ, ऐ, औ, ह, य, व, र, ल; ञ, म, ङ, ण, न ।

अल्–अ, इ, उ, ऋ, लृ, ए, ओ, ऐ, औ, ह, य, व, र, ल, ञ, म, ङ, ण, न, झ, भ, घ, ढ, ध, ज; ब, ग, ड, द, ख, फ, छ, ठ, थ, च, ट त, क, प, श, ष, स, ह ।

अश्–अ, इ, उ, ऋ, लृ, ए, ओ, ऐ, औ, ह, य, व, र, ल, ञ, म, ङ, न, झ, भ, घ, ढ, ध, ज, ब, ग, ड, द ।

इक्–इ, उ, ऋ, लृ ।

इच्–इ, उ, ऋ, लृ, ए, ओ, ऐ, औ ।

इण्–इ, उ, ऋ, लृ, ए, ओ, ऐ, औ, ह, य, व, र, ल ।

उक्–उ, ऋ, लृ ।

एङ्—ए, ओ।

एच्—ए, ओ, ऐ, औ।

ऐच्—ऐ, औ।

खय्—ख, फ, छ, ठ, थ, च, ट, त, क, प।

खर्—ख, फ, छ, ठ, थ, च, ट, त, क, प, श, ष, स।

ङम्—ङ, ण, न।

चय्—च, ट, त, क, प।

चर्—च, ट, त, क, प, श, ष, स।

छव्—छ, ठ, थ, च, ट, त।

जश्—ज, ब, ग, ड, द।

झम्—झ, भ, घ, ढ, ध, ज, ब, ग, ड, द, ख, फ, छ, ठ, थ, च, ट, क, प।

झर्—झ, भ, घ, ढ, ध, ज, ब, ग, ड, द, ख, फ, छ, ठ, थ, च, ट, क, प, श, ष, स।

झल्—झ, भ, घ, ढ, ध, ज, ब, ग, ड, द, ख, फ, छ, क, प, श, स, ह।

झश्—झ, भ, घ, ढ. ध, ज, ब, ग, ड, द।

झष्—झ, भ, घ, ढ, ध।

बश्—ब, ग, ड, द।

भष्—भ, घ, ढ, ध।

मय्—य, ङ, ण, न, झ, भ, घ, ढ, ध, ज, ब, ग, ड, द, ख, छ, ठ, थ, च, ट, त, क, प।

यञ्—य, व, र, ल, ञ, म, ङ, ण; न, झ, भ।

यण्—य, व, र, ल।

यम्—य, व, र, ल, ञ, म; ङ, ण, न।

यय्—य, व, र, ल, ञ, म, ङ, ण, न, झ, भ; घ; ढ; ध; ज; ब; ग, द, ख, फ; छ; ठ, थ; च; ट, त, क; प,

यर्–य, व; र, ल; ज, म, ङ, ण, न, झ, भ, घ; ढ, ध; ज, ब; ग, ड; द; ख, फ, छ; ठ, थ, च, ट, त; क, प; श; ष, स ।

रल्–र, ल, ञ; ङ, ण, न; झ, भ, घ; ढ, ध; ज; ब, ग, ड, द, ख, फ, छ, ट, ठ, थ, च, त, क, प, श, ष, स, ह ।

वल्–व, र, ल, ज, म, ङ, ण, न, झ, भ,घ, ज, ब, ग, ड, द, ख, फ, छ, ठ, थ, च, ट, त, क, प, श, ष, स, ह ।

वश्–व, र, ल, ञ, म, ङ, ण, न, झ, भ, घ, ढ, ध, ज, ब, ग, ड, द ।

शर्–श, ष, स ।

शल्–श, ष, स, ह ।

हल्–ह, य, व, र, ल, ञ, म, ङ, ण, न, झ, भ, ढ, ध, ज, ब, ग, ड, द, ख, फ, छ, ठ, थ, च, ट, न, क, प, श, ह, स, ह ।

हश्–ह, य, व, र, ल, ज, म, ङ, ण, य, झ, भ, घ, ढ, ध, ज, ब, ग, ड, द ।

आभ्यान्तर और बाह्य प्रयत्न ज्ञापक चक्र

प्रयत्न	स्पृष्ट			ईषत्स्पृष्ट	ईषद्विवृत		विवृत	संवृत
संज्ञा	स्पर्श			अन्तःस्थः	ऊष्मा		उदात्त; अनुदात्त स्वरित स्वर	
व्यञ्जन, स्वर	क ख प फ च छ ट ठ त थ	ग ङ ब म ज ञ ड ण द न	घ भ झ ढ ध	य व र ल	श ष स	ह	अ इ, ए उ ओ ऋ ए ऌ ए	प्रयोग में ह्रस्व अ
बाह्य प्रयत्न	अ.प्रा.म.प्रा. विवार श्वास अघोष	अल्प.प्रा. संवार नाद घोष	म.प्रा. संवार नाद घोष	अल्प. संवार नाद घोष	म.प्रा. वि श्वास अघोष	म.प्रा. सं. ना. घोष	अल्प प्राण सवार नाद घोष	अल्प प्राण संवार नाद घोष

वर्णोद्भवस्थान ज्ञापक चक्र

कंठ	तालु	मूर्धा	दन्त	ओष्ठ	नासिका	क०ता०	कं०ओ०	द०ओ०	जि०मू०	ना[illegible]
अ	इ	ऋ	लृ	ड	ञ	ए	ओ	व	४क	
क	च	ट	त	प	म	ऐ	औ			
ख	छ	ठ	थ	फ	ङ					
ग	ज	ड	द	व	ण				४ख	
घ	झ	ढ	ध	भ	न					
ङ	ञ	ण	न	म						
ह	य	र	ल	४प						
:	श	ष	स	४फ						

प्रत्याहार सिद्धिः (अण्)

आदिरन्त्येन सहेता—'आदिः, अन्त्येन, सह, इता पद विभागः। अत्र स्— अद्यन्तशब्दस्या मध्यगाः आक्षिप्यन्ते 'स्वरूपम्' इति सूत्रात् 'स्वम्' इत्यनुवर्तते ततश्च—

अन्त्येन इता सह उच्चार्य माणः आदिः (अण्, अच, इत्यादि रूः मध्यगानाँ स्वस्य च प्रत्याहार संज्ञेति सूत्रार्थो लभ्यते। उदाहरण यथा— अ, उ, ण, इति सूत्र घटक अण् इति अत्र अन्त्येत्संज्ञक वर्ण 'ण' इति, तेन उच्चार्यमाणः आदि वर्णः 'अण' इति स च (अण) मध्यगानाँ (इ; इत्यनयोः) स्वस्य (अ उत्यस्य) च संज्ञको भवति।

अ, ज, उ, व एषां वर्णानां स्थानानि—अकारस्य कण्ठस्थानम् (अ— विसर्जनीयानाँ कण्ठः) जकारस्य तालु स्थानम् (इयुयशानां तालु) उकारस्य ओ— स्थानम् (उपपध्मानीयानामोष्ठौ) वकारस्य दन्तस्थानम्, ओष्ठ स्थान च (वका— स्य, दन्तोष्ठम्)।

प्रयत्नाः कति ? के चते ? ह, प, य, वर्णांनां के आभ्यान्तर प्रयत्नाः (४७, ५२) प्रयत्नोद्विधा आभ्यान्तरो वाह्यश्च। तत्राद्यः 'स्पृष्ट-ईषत्स्पृ— ईषद्विवृत-विवृत-सवृत भेदात् पञ्चधा। द्वितीयो वाह्य प्रयस्तु विवार-श्वा— वास-नाद-अघोष-घोष-अल्प प्राण-महाप्राण-उदात्त-अनुदात्त स्वरित भेदात् एका— त्युभयोर्मिलित्वा प्रयत्नाः षोडश इति तत्व विदः।

तत्राभ्यन्तर प्रयत्ने हकारस्य ईषद्विवृतप्रयत्न (ईषः द्वि वृतमूष्मणाम् स्वराणां

णाः' इति वचनात्) एवं पकारस्य स्पृष्ट प्रयत्नः (स्पृष्ट प्रयतनंस्पर्शानाम्
नादयोमावसानाः स्पर्शाः' इति वचनात्) तथैव यकारस्य ईष, स्पृष्टप्रयत्नः ईष-
न्तस्थानाम् 'यणोऽन्तस्थानाम्' इति निर्देशात् ।

अचां के प्रयत्ना:-आभ्यान्तर प्रयत्ने-अचां विवृत प्रयत्नम्, तत्रापि ह्रस्वस्या-
स्य प्रयोगे (सावनिकादशायां) संवृत प्रयत्नमिति विशेषः । शास्त्रीयप्रक्रि-
परिष्ठितानां राम कृष्णः इत्यादि शब्दानां प्रयोगे क्रियमाणे एव ह्रस्वस्य-
संवृत मित्यर्थः । अत एव दण्ड आढकम् इतिस्थिते अकाराऽऽकारयोः
साम्यातावर्णं द घंत्व सिद्धम् ।

ाह्य प्रयत्ने-अचां तु अल्प प्राणः संवारः नादः, घोषः, इति चत्वारः
ः भवन्तीतिः तत्वविदः ।

स-ट, ख-ह, च-य, वर्णानां कानि स्थानि प्रभत्नानि ?

(१६४८, ४६, ५०, ५१)

कारस्य दन्तस्थानम् (लृतुलसानां दन्ताः इति निर्देशात्) टकारस्य तु मूर्धा
(ऋटुरषाणां मूर्धा इति वचनात्) अनयोर्बाह्य प्रयत्ने विचार श्वास-
-प्रयत्नाः अल्पप्राण प्रयत्नाश्च विद्यन्ते (खरो विवायाः श्वासा अघोषश्च)
म्-प्रथम-तृतीयः पञ्चमा-यणश्चाल्प प्राणाः इति वचनात्) आभ्यान्तर
उभयोः स्पृष्टप्रयत्नएवेति (स्पृष्ट प्रयतनं स्पर्शानाम्-अदयोमावसानाः स्पर्शा
चनात्)

कारस्य कारस्य च कंठ स्थानम् (अकुहविसर्जनीयानां कण्ठः इत्यु. त्वात्)
प्रयत्नेतु-अनयोर्मध्ये खकारस्य विवार श्वास अघोष प्रयत्नाः महाप्राण
केति (खरोविवाराः श्वासाअघोषास्च वर्गाणां द्वितीय चतुर्थोशलश्च महा
नाः इति निर्देशात्) हकारस्य तु संवार नाद घोषप्रयत्नाः महाप्राण प्रयत्नाश्चेति
सवारा नादा घोषास्च । वर्गाणां.........शलश्च महाप्राणः इत्युक्तत्वात्)
न्तर प्रयत्नेतु खकारस्य स्पृष्ट प्रयत्नः हकारस्य तु ईषद्विवृतप्रयत्नः (स्पृष्ट
म्-कादयो".......स्पर्शाः ईषद्विवृतमूष्मणाम् श ष स हा ऊष्माणः'
वात् ।

चकारस्यतालु स्थानम्, यकारस्य तु ओष्ठ स्थानम् (इचुयशानांतालु उपूपध्मानी-

यामामोष्ठौ इतिवचनात्) उभयोः वाह्यप्रयत्ने तु विवार-श्वास अघोष प्रयत्नाः अल्प प्राण प्रयश्चेति (खरो ··· अघोषाश्च, वर्गाणां प्रथम··· प्राणाः' इति निशर्दात्) एवमाभ्यान्तर प्रयत्नेऽमुनयोः स्पष्ट प्रयत्नएवेति। ······स्पर्शाः इत्युक्तत्वात्)। अ–इ, क–ख, च–छ–ट, ग–ड–म–घ, वर्णा.ां वाह्यप्रयत्नाः (१६३६ ४१, ४६, ४८) एषां प्रश्नोत्तर लेख स्तूपयुंक्तवद्वोध्यः उत्तराणि तु ग्रस्थादौ चक्रे रदृष्टव्यानि।

संज्ञा विधायक सूत्राणि

संहिता–संहिता संज्ञा विधायक सूत्रम् 'परः सनिन्नकर्षः सहिता' इति अर्थस्तु–वर्थानामति शयितः सनिधिः सहिता संज्ञः स्यात्।

सयोग–सज्ञाविधायङ्क सूत्रम्–'हलोऽनन्तरा सयोगः' अर्थं–अज्भित्त्व्यवहिता हलः सयोग संज्ञा स्युः।

पद संज्ञा–'सुप्तिङन्तं पदम्' अर्थंस्तु सुवन्तं तिङन्तं च,पद सज्ञं स्यात्

सवर्णा–तुल्यास प्रयत्नं सवर्णम्' अर्थं—ताल्वादिस्थामाभ्यान्तर प्रयत्न यस्य येन तुल्य तन्मिथः सवर्णसंज्ञ स्यात् (६५, ६६)

गुण–'अदेङ्गुणः' अर्थ—अदेड च गुण सज्ञः स्यात्। (सन् १६६८)

वृद्धि–संज्ञा विधायक सूत्रम् 'वृद्धिरादैचि' इति। अर्थं—आदैच्य वृद्धि सज्ञः स्यात्। (सन् १६६८)

भ संज्ञा विधायक सूत्रम्—'यचिभम्' इति। अर्थस्तु यादिष्वजादिषु कप्रत्ययावधिषु स्वादिष्व सर्वनामस्थानेसु पूर्वं भ स्यात्।

स्वरों का अष्टादश भेद मापक चक्र

अ इ उ ऋ लृ	अ इ उ ऋ ए ओ ऐ औ	अ इ उ ऋ लृ ए ओ
(ह्रस्व भेद)	(दीर्घ भेद)	(प्लुत भेद)
१–ह्रस्व उदात्तानुनासिक	७–दीर्घ उदात्तानुनासिक	१३–प्लुत उदात्तानुना
२– " उदात्ताननुनासिक	८– " उदात्ताननुनासिक	१४– " उदात्ता नुन
३– " अनुदात्तानुनासिक	९– " अनुदात्तानुनासिक	१५– " अनुदात्तानुन
४–" अनुदात्ताननुनासिक	१०–"अनुदात्ताननुनासिक	१६– " अनुदात्ता
५– " स्वरितानुनासिक	११–"स्वरितानुनासिक	१७– " स्वरितानुनासि
६– " स्वरिताननुनासिक	१२–"स्वरिताननुनासिक	१८– " स्वरिताननुन

अथ अच सन्धि प्रकरणम्

मध्वरिः–(१६६५) मधु+अरिः इति दशायां 'इकोयणचि' इति सूत्रेण अव्यवहितपूर्वत्वविशिष्ट इक् धाकारोत्तरवर्ती 'उः' तस्य स्थाने 'स्थानेऽन्तरतमः' परिभाषया (वकारस्य दन्त्योष्ठम्-उपध्मानीयानामोष्ठौ उभयोः उकारयोः स्थान साम्यात्) 'व' जाते 'मध् व् अरिः' इत्यवस्थायाम् 'अनचिच' विद्वित्वे 'झलां जश् झशि' इत्यनेन धकारस्य दकारे 'संयोगान्तस्य लोपः' सूत्रेण लोपे प्राप्ते 'यणः प्रतिषेधो वाच्यः' इत्यनेननिषिद्धे सति मध्वरिः रूप सिद्धम् ।

विष्णवे–(५८) 'विष्णो ए' इति स्थिते 'यथासंख्यमनुदेशः समानाम्' इति ज्ञापकात् 'एचोऽयवायावः' इति ओकारस्य अवा देशे विष्णवे इति जातम् ।

गङ्गोदकम्–(१६६६) गङ्गा+उदकम् इति स्थिते'आद्गुणः' इत्यनेन पूर्वपरयोः आकार-उकारयोः स्थाने ओकारे कृते गङ्गोकमिति जातम् ।

गव्यम्–गोर्विकारो गव्यम् (विकारार्थे यत्) 'गो यम् इति स्थिते ओकारस्य रकत्वाभावात् 'एचोऽयवायावः' इत्यप्राप्ते 'वान्तो यि प्रत्यये' इति ओकारस्य वदेशे उक्त रूपं सिद्धम् ।

कृष्णर्द्धिः–(ई० ४१, ४५, ५२, ६८) कृष्ण+ऋद्धिः इति स्थिते अत्र गुणः' इत्यनेन अकार-ऋकारयोः स्थाने 'ऋकारस्य गुण वृद्धी अरारावेव' भाष्योक्त्या गुणे अकारे जाते 'उरण् रपरः' इति रपरत्वे उक्त रूप सिद्धम् ।

विष्णो इह–(ई० ४८, ६६) विष्णो इह इति स्थिते 'सम्बुद्धौ शाकल्यस्येतावनार्षे' इति प्रगृह्यऽसंज्ञायां 'प्लुतः प्रगृह्याऽचि नित्यम्' इति प्रकृतिभावे' विष्णो इति । प्रगृह्यत्वाभावे 'एचोऽयवायावः इत्यनेन ओकारस्य यथासंख्येन अवादेशे 'विष्ण् अव् इह' इति जाते 'लोपः शाकल्यस्य' इत्यनेन अवर्णपूर्वस्य वकारस्य लोपे 'विष्ण इह' इति जाते 'पूर्वत्रासिद्धम्' इत्यनेन 'लोपः शाकल्यस्य' इति लोपस्याऽसिद्धत्वात् वकारस्य विद्यमानत्वेन गुणाप्राप्तौ विष्ण इह इति । लोपाभावे 'विष्णविह' इति ।

प्रार्षभीयति–(४१, ४२, ४३, ५२, ५३) ऋषभमात्मन इच्छति ऋषभीयति । प्र ऋषभीयति इथि स्थिते गुण प्रबाध्य 'वा सुप्यापिशलेः' वृद्धो रपरत्वे 'प्रार्षभीयति' इति । वृद्धो सति अचोरहाभ्यां द्वे" इति द्वित्वे 'शरोऽचि' इति निषेधात् । वृद्धयाभावपक्षे तु आदगुणः' इति गुणे रपरत्वे प्रर्षभीयति' इति ।

शकन्धुः–(४७, ६५) शक+अन्धुः इति स्थिते अत्र 'अकः सवर्णे' इत्यनेन दीर्घे प्राप्ते त बाधित्वा 'शकन्ध्वादिषु पररूपं वाच्यम् ।। इत्यनेन प्राप्ते तच्च पररूप टेः–टिसंज्ञकस्य भवति । टि संज्ञा च 'अचोऽन्त्यादिटि,' इति ककारोत्तरवर्ति-अकारस्य भवति । एवञ्च शक-अन्धुः, इत्यत्र' अचोऽन्त्यादि इत्यने टि संज्ञायाम् पूर्व परयोः स्थाने पररूपे सति शकन्धुः, इति भवति ।

प्रार्च्छतीति–(१६६६ ई०) 'प्र ऋच्छति' इति स्थितेऽत्र ऋच्छ क्रियावाचकत्वाद् 'भूवादयो धातवः 'इत्यने । धातुसंज्ञायाम् 'प्र' इत्यस्य योगात् 'उपसर्गाः क्रियायोगे' इत्यने । उपसर्ग संज्ञायाम् 'उपसर्गादृति' इत्यनेन पूर्व परयोः स्थाने आरूप वृद्धौ रपरे च प्राच्छतीति सिद्धयति ।

पतञ्जलिः (ई०, ५२, ६८) पतत् अञ्जलिः इतिस्थिते 'शकन्ध्वादिषु पररूपं वाच्यम्' इत्यनेन 'अत्' इति टेः, अकारस्य च स्थाने पररूपे अकारे 'पतञ्जलिः' इति जातम् ।

शिवेहि–(४२, ५१, ५३, ६८) शिव+आ+इहि–इतिस्थिते अन्तरङ्गान् उपसर्गयोः कार्यमन्तरङ्गम्' इति परिभाषाया पूर्वम् 'आ–इहि । उत्यत्र आद्गुणः इत्यने । सूत्रेण गुणे एहीति जाते तत्र 'अन्तादिवच्च' इत्यनेन सूत्रेण उन्त- मादाय 'ओमाङोश्च' इत्यने । पररूपे कृते सति शिवेहि इति रूपसिद्धिर्बोध्या ।

गवाग्रम्–(४५, ४६, ६८) 'गो+अग्रम्' इति स्थिते 'एचोऽयवायावः' इत्यत्रादेश प्रबाध्य 'सर्वत्र विभाषा गोः' इति प्रकृतिभावे प्राप्ते यामपि 'अवङ् स्फोटायनस्य' इत्यनेन अग्रमित्येतद्घटकाकारे परे पदान्ते विद्यमान एङन्तगोशब्दस्य 'अनेकाल्शित्सर्वस्येति परिभाषया सम्पूर्ण स्थाने अव 'ङिच्चेत्यने । गकारोत्तर वर्तिनः ओकारस्य अवङ् अनुबन्धलोपे 'गव अग्रम्' इत्यवस्थायाम् 'अकः सवर्णे दीर्घः' इति सवर्णदीर्घे 'गवाग्रम्' इति रूपं निष्पन्नम्

अवङादेशाभावपक्षे 'सर्वत्रविभाषागोः' इति प्रकृतिभावे 'गो अग्रम्' इति । इत्यवङादेशाभावपक्षे 'एङः पदान्तादति' इति पर रूपे गोऽग्रम् इति जातम् ।

हरीएतौ–(६९ ई०) हरी+एतौ इत्यत्र 'ईदूदेद् द्विवचन प्रगृह्यम्' इत्यनेन प्रगृह्य सञ्ज्ञायाम्' प्लुत प्रगृह्या अचि नित्यम्' इत्यनेन सूत्रेण प्रकृति भावे हरीएतौ इति सिद्धम् ।

अमी ईशाः– (५०,६८) 'अमी ईशाः' इतिदशायां सवर्ण दीर्घं प्रबाध्य 'अदसो मात्' इति अदः शब्द सम्बन्धिमकारात्परस्य ईकारस्य प्रगृह्य संज्ञायाम्' प्लुति प्रगृह्या अचि नित्यम्" इति प्रकृति भावे अमी ईशाः इति ।

अहो ईशा– (६५ई०) अत्र 'ओत्' इति सूत्रेण प्रगृह्य संज्ञायाम्' प्लुति प्रगृह्या अचि नित्यम्' इत्यनेन सूत्रेण प्रकृति भावे चसति अहो ईशा इति भवति ।

विष्णो इति–(४१,४२,४४,५८)विष्णो इति' इत्यव स्थायाम् 'एचोऽयवायावः' इत्यनेन अवादेशे प्राप्ते तम्प्रबाध्य ' सम्बुद्धौ शाकल्यस्येतावनार्षे' इत्यनेन विभाषया प्रगृह्य संज्ञायाम् 'प्लुत प्रगृह्या अचि नित्यम्' इत्यनेन प्रकृतिभावे 'विष्णो इति' प्रगृह्यत्वाऽभावपक्षे 'एचोऽयवायावः' इत्यनेन अवादेशे 'लोपः शाकल्यस्य' इत्यनेन विकल्पेन वकारस्य लोपे 'विष्ण इति' इति स्थिते 'पूर्वत्रा सिद्धम्' इत्यनेन व लोपः शाकल्यस्य–लोपः शाकल्यस्येत्यस्य असिद्धत्वात् 'आदगुणः' इत्यनेन गुणाऽभावे विष्ण इति' इति वलोपाभावपक्षे विष्णविति इति ।

किम्वुक्तम्–(४३, ६९) किम् उ उक्तम् इति दशायां 'मय उञो वो वा' इत्यनेन मकारात् परस्य उञः उकारस्य वकारादेशे किम् व उक्तम् इति जाते अज्झीनं परेण संयोज्यम्' किम्वुक्त इति निष्पन्नम् । वकाराऽभावपक्षे 'निपातएकाजनाङ्' इत्यनेन प्रगृह्य सञ्ज्ञायाम् 'प्लुत प्रगृह्या अचि नित्यम्' इत्यनेन प्रकृति भावे किमु उक्तम् इति च जातम् ।

चक्रि अत्र–(४९, ५१, ६८) चक्री+अत्र इतिस्थिते 'इकोयणचि' इत्यनेन यणि प्राप्ते त प्रबाध्य 'इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च' इति विकल्पेन ह्रस्वे कृते ह्रस्व विधि सामर्थ्यात् पुनः यणोऽप्राप्त्या चक्रि अत्र इति भवति । ह्रस्वाभाव पक्षे च यणि चक्र्यत्र इति जायते ।

ब्रह्मर्षिः–(५१, ६५, ६८) 'ब्रह्मा ऋषिः' इति स्थितौ 'ऋत्यकः' इत्य-

नेन पदान्तस्य अक् प्रत्याहारान्तर्गतमकारोत्तरवर्तिन आकारस्य ह्रस्वत्वे ब्रह्म ऋषिरिति जायते । पक्षे 'आदगुणः' इति पूर्व परयोः स्थाने गुणे रपरे ब्रह्मर्षिरिति रूपम्भवति ।

(अथ हल्सन्धिप्रकरणम्)

तट्टीका-(४८, ५१) तद्+टीका इत्यवस्थायां 'ष्टुना ष्टुः' इत्यनेन दस्य ष्टुत्वेन डकारे 'खरि च' इति तस्य चर्त्वे तट्टीका रूपं जातम् ।

षण्णाम्-(५३) 'षष् नाम' इति स्थिते स्वादिष्वित्ति पदत्वात् षस्य जश्त्वे डकारे 'प्रत्ययेभाषायां नित्यम्' इति तस्य णकारे षण् नाम इति जाते ष्टुयोगात् मकारस्य 'ष्टुनाष्टुः' इति ष्टुत्वेन णकारे षण्णाम् इति रूपं निष्पन्नम् ।

८० एतन्मुरारिः-(५०) एष चासौ मुरारिः एतन्मुरारिः । एतद् + मुरारिः स्थिते 'यरोऽनुनासिकेऽनुनासिको वा इत्यनेन दस्यानुनासिके नकारे एतन्मुरारिः इति । पक्षे 'एतद्मुरारिः इति च भवति ।

विद्वाँल्लिखति-(४३; ६९) विद्वान्+लिखति इति स्थिते न स्थानिनोऽनुनासिकस्य परसवर्णो ल कारो भवन् आन्तर्यादनुनासिक एव जातस्तेन विद्वाँल्लिखति इति सिद्धम् ।

उत्थानम्-(४१, ४३, ५१, ५२, ६९) उद् स्थानम् इति स्थिते 'उदः स्थास्तम्भोः पूर्वस्य' इत्यनेन प्राप्तः पूर्वसवर्णः कस्यस्याद् इति शङ्कायां तस्मादित्युत्तरस्य' इत्यनेन वर्णान्तराव्यहितस्य परस्य 'स्था' इत्यस्य आदि भूतस्य सकारस्य स्थाने पूर्वसवर्णे निश्चिते तत्स्थाने अघोषमहाप्राण प्रयत्न साम्यात् तादृशे थकारे जाते 'उद् थ् थानम्' इति दशायां 'झरोझरि सवर्णे' इत्यनेन पूर्व थ कारलोपे 'खरि च' इत्यनेन दकारस्य चर्त्वे 'उत्थानम्' इति । पक्षे झरो झरि सवर्णे वैकल्पिकत्वलोपाभवि उत्थानम् इति च सिद्धम् ।

वाग्घरि—(४९) वाक्+हरिः इति स्थिते 'झलां जशोन्ते' इति कृते वाग् हरिः इति दशायां 'झयो होऽन्यतरस्याम्' इति पूर्व सवर्णविधौ पूर्व निमित्तत्वात् तत्सवर्णेषु क-ख-ग-घ-ङ इत्येतेषु पञ्चस्वपि प्राप्ते घोषवतो नादवतो महाप्राणस्य संवृतकण्ठस्य हस्य स्थाने घकारे जाते वाग्घरिः रूप जातम् । पूर्व सवर्णाऽभावपक्षे वाग्हरिः 'इति सिद्धं भवति । ।

तच्छिवः–(४१,६५) तद्+शिवः इति स्थिते 'अत्र दकारस्य 'स्तोः श्चुनाश्चुः' इत्यनेन सूत्रेणश्चुत्वे-जकारे कृते तस्य जकारस्य 'खरि च' इत्यनेन चकारे कृते तच्-शिवः इति जाते तदनन्तरं 'शश्छोटि' इत्यनेन झयः पतिनश्चकारात्परस्य अट् प्रत्याहारान्तः पातिनिशकारोत्तर वर्तिनीकोर परे छत्वे च विहिते छिवः । इति सिद्धम् । छत्वाभावे तचशिवः इति भवति ।

त्वङ्करोषि—(६५) त्वम्+करोषि इति स्थिते 'मोऽनुस्वारः' इत्यनेन मकारस्य मस्यानुसारे विहिते सति तस्य स्थाने 'वा पदान्तस्य' इत्यनेन विकल्पेन जातेऽस्य ककारस्य सवर्णे क ख ग घ ङ इति सर्वस्मिन् प्राप्ते 'स्थानेऽन्तरतमः' इत्यनेन अनुस्वारस्य नासिका स्थानत्वात् तत्स्थान तुल्योङकारो जातः । तेन त्वङ्करोषि इति भवति । पक्षे अनुस्वारात्मकम्– त्वं करोषि' इति रूपम् ।

षटत्सन्तः–(४२,४६,५२,६८) षड्+सन्तः इति दशायाम् 'डः सि धुट्' इत्यनेन । 'आद्यन्तौ टकितौ' इति सहकारात् उकारात्परस्यादौ धटि अनुबन्धलोपे षड् ध् सन्तः' इति स्थिते 'खरि च' इति धस्य चर्त्वे कृते पुनः उकारस्याप्यने एवं 'षटत्सन्तः' इति । धड्भावपक्षे उकारस्य चर्त्वे षट् सन्तः इति जातम् ।

प्राङ् क्षष्ठः–(४७, ४९; ५२, ६५) प्राङ+षष्ठः इति स्थिते 'ङ्णो' कुक्शरि' इति ङकारस्य कुकि 'आद्यन्तौ टकितौ' इत्यनेन ङकारान्ते जाते-अनुबन्ध लोपे प्राङ् क् षष्ठः, इति स्थिते 'चयो द्वितीयाः शरि पौष्करसादेरिति-वाच्यम्' इति वार्तिकेन ककारस्य द्वितीयाक्षरे खकारे 'प्राङ्खषष्ठः इति द्वितीया-क्षरा भावे कषयोः संयोगे' प्राङ् षष्ठः इति । कुकागमाभावे प्राङ् षष्ठः इति जातम् ।

सञ्च्छम्भु–(५०, ५२, ६९) सन्+शम्भुः इतिस्थिते 'शि तुक्' इत्यनेन तुगागमे ककारस्य 'हलन्त्यम्' इत्यनेन उकारस्य 'उपदेशेऽजनुनासिक इत्' इत्यनेन च इत्संज्ञायाम् 'तस्य लोपः' इति लोपे च 'सन् त् शम्भु इति जाते' शश्छोटि इत्यनेन विकल्पेन शस्य छत्वे 'स्तोश्चुनाश्चु' इत्यनेन तकारस्य चकारे पुनः' 'स्तोश्चुनाश्चु' इति नस्य ञकारे सञ्च्छम्भुः इति । 'झरो झरि' इति चकार लोप पक्षे सञ्छम्भुः इति । छत्वाभावे लोपे चाकृते चुत्वे च कृते सञ् च शम्भु इति

तुकोऽभावे छत्वाभावे च नकारस्य श्चुत्वेन ञकारे च कृते सञ् शम्भुः इति च सिद्धम् ।

तदुक्तम्—ञ छौ ञचछा ञधशा ञशाविति चतुष्टयम् ।

रूपाणामिह तुक्छत्वचलोपानां विकल्पनात् ॥

सन्नच्युतः—(५०, ६८) सम्+अच्युतः इति दशायां 'ङमो ह्रस्वादचि ङमुण् नित्यम्' इति ह्रस्वात्परस्य ङमप्रत्याहारान्तःपातिनो नकारात् परस्य अच प्रत्याहारान्तर्गवर्तिनोऽकारस्य ङमुटि अनुबन्धलोपे वर्ण सम्मेलने सन्नच्युतः' इति जातम् ।

संस्कर्ता—(४३, ४५, ४८, ५२, ६६) सम+कर्ता इत्यत्र 'सम्परिभ्यां करोतौ भूषणे' इति सूत्रेण सुडागमेऽनुबन्धलोपे सम् स्कर्ता इति जाते 'समः सुटि' इत्यनेन अन्त्यस्य मस्य रुत्वे अनुबन्धलोपे सरस कर्ता इति जाते 'अत्रानुनासिकः पूर्वस्य तु वा' इत्यनेन रोः पूर्वमनुनासिके 'खरवसानयोर्विसर्जनीयः' इति सूत्रेण रेफस्थाने विसर्गे 'संपुंकानांसोवक्तव्यः' इतिवार्तिकेन विसर्गस्य सकारे च कृते सँस्कर्ता इति । पक्षेऽनुनासिकाभावे 'अनुनासिकात्परोऽनुस्वारः' इति सूत्रेण अनुस्वारे जाते संस्कर्ता इति च सिद्धम् ।

पुंस्कोकिलः—(४८; ५६, ६८) पुम+कोकिलः इति दशायां 'पुमः खय्यम्परे' इत्यनेन पुमो मस्य रुत्वे अनुबन्धलोपे 'अत्रानुनासिकः पूर्वस्य तु वा' इति सूत्रेण अनुनासिके पुँर कोकिलः इति स्थिते 'खरवसानयोर्विसर्जनीय' इत्यनेन रेफस्य विसर्गे 'कुप्वोः ⌣क ⌣पौ च' इत्यनेन जिह्वामूलीये प्राप्ते तम्प्रबाध्य 'सम्पुंकानां सोवक्तव्यः' इति वार्तिकेन विसर्गस्य सत्वे पुँस्कोकिलः इति । अनुनासिकाभावपक्षे 'अनुनासिकात्परो ऽनुस्वारः इत्यनुस्वारे कृते पुंस्कोकिलः इति ।

६० चक्रिंस्त्रायस्व—(४१, ४६) चक्रिन्+त्रायस्व इति स्थिते 'नश्छव्यप्रशान्' इति नान्तस्य पदस्य चक्रिन् इत्यस्य रुत्वे प्राप्ते 'अलोऽन्त्यस्य इति 'म्' इत्यस्य स्थाने कृते अवपरकछव् प्रत्याहारान्तःपातिनिककारे परे । तदा चक्रि स भायस्त्र इति जाते रेफोत्तरवत्युकारस्येत्संज्ञायां लोपे च चक्रिर त्रायस्व इति जाते । अत्र 'अत्रानुनासिक पूर्वस्यतु वा' इति अनुनासिके पक्षे—'अनुनासिकात्परोऽनुस्वारः इत्यनुस्वारे च चक्रिर त्रायस्व चक्रिरं त्रायस्व इति जाते 'खरवसानयोर्विसर्जनीयः'

इति उभयत्र रेफस्य विसर्गे 'विसर्जनीयस्य सः' इति विसर्गस्य सत्वे चत्रिस्त्रायस्व चक्रिस्त्रायस्व इति।

कांस्कान–(४४, ४७) कान्+कान इति स्थिते प्रथमनकारस्य 'कानाम्रेडिते' इत्यनेन रुत्वे उकार लोपे 'अत्रानुनासिकपूर्वस्य तु वा' इत्यनुनासिके काँर कान् इति जाते पक्षे 'अनुनासिकात्परोऽनुस्वारः' इत्यनुसारे कांर कान इति भूते अत्र 'खरवसानयोर्विसर्जनीयः' इति रेफस्यविसर्गे 'कुप्वोः ≍ क ≍ पौ च' इत्यनेन जिह्वामूलीये प्राप्ते तम्प्रबाध्य 'सम्प्रं कानां सो वक्तव्यः' इति वार्तिकेन सत्वे च कृते काँस्कान, कांस्कान् इति।

सर्पिष्पाशम्–(४५, ६५) सर्पिः+पाशन् इति स्थिते 'सोपदादौ' इति विसर्गस्य सत्वे प्राप्ते त प्रबाध्य 'इणः षः' इति इण उत्तरस्य रुसन्निबन्धिनो विसर्गस्य सत्वे उक्त रूप जातम्।

कस्कः–(४६, ५०) वीप्सायां द्वित्वे पूर्वखण्डे अकारात् परस्य विसर्गस्य 'कस्कादिषु च' इत्यनेन सत्वे 'कस्कः' इति। षत्वन्तु न 'कष्कादिषु च' इत्यनेन इणः परस्यैव विसर्गस्य षत्वविधानात्,

लक्ष्मीच्छाया–(४०, ६६) लक्ष्मी छाया इति स्थिते 'छे च' इत्यनेन तुकि (उकांवितौ) लक्ष्मी त छाया इत्यत्र 'झलां जशोन्ते' इत्यनेन तकारस्य दकारे 'स्तोश्चुनाश्चुः' इति दकारस्य जकारे 'खरि चे' ति जकारस्य चकारे परसंयोगे लक्ष्मीच्छाया इति रूप सिद्धम्।

(अथ विसर्ग सन्धि प्रकरणम्)

हरिः शेते–(५०, ६५) हरि+शेते इति स्थिते 'वा शरि' इत्यनेन विसर्गस्य विसर्गे हरिः शेते इति विसर्गा भावपक्षे तु 'विसर्जनीयस्य सः' इति विसर्गस्य सत्वे 'स्तोश्चुनाश्चुः' इति सस्य शकुत्वेन शकारे हरिश्शेते इति भवति।

हरिः स्फुरति–(४३, ४६, ४६, ५०, ५१) हरिः स्फुरति इति स्थिते 'खर्परे शरि वा विसर्ग लोपो वक्तव्यः' इति वार्तिकेन विसर्गस्य लोपे हरिस्फुरति इति। लोपाऽभावे 'वासरि' इति विसर्गस्य विसर्गे हरिः स्फुरति। इति। विसर्गो-

भाव पक्षे 'विसर्जनीयस्य सः' इति विसर्गस्य सत्वे हरिस्स्फुरति इति च तृतीयं रूपं सिद्धं भवति ।

(अथ स्वादि सन्धि प्रकरणम्)

शिवोऽर्च्यः-(४०, ४८, ४६, ६५, ६६) शिवस्+अर्च्यः इत्यवस्थायां 'ससजुषो रुः' इति सस्य रुत्वे 'अतोरोरप्लुतःदप्लुते' इति सूत्रेण रोरुत्वे शिव उ अर्च्यः इति जाते तत्र 'आदगुणः' इतिसूत्रेण पूर्व परयोः स्थाने गुणे विहिते शिवो अर्च्यः इति जाते 'एङः पदान्तादति' इति सूत्रेणार्च्यः इत्यस्याकारस्य पूर्वरूपादेशे च विदिते शिवोऽर्च्यः इति सिद्धम् ।

देवा इह-(४६, ५०, ६५) देवास्+इह इतिदशायां 'ससजुषोरुः' इति रुत्वे 'भो भगो अघो अपूर्वस्य योऽशि' इति रोर्यादेशे 'लोपः शाकल्यस्य' इति य लोपे देवा इह इति सिद्धम् यलोपाभावे देवामिह इति रूपं जातम् ।

शिवोवन्द्यः (६८) शिवस्+वन्द्यः इत्यत्र 'ससजुषोरुः' इत्यनेन सस्य रुत्वे 'हशि च' इत्यनेन हशप्रत्याहारान्तः पातिनि वन्द्यघटकवकारे परे रोरुत्वे आदगुणः' इत्यनेन पूर्वपरयोः स्थाने गुणे च कृते शिवोवन्द्यः इति रूप जातम् ।

देवा यान्ति (६६) अत्र देवास इति सकारस्य 'ससजुषो रुः' इति रुत्वे 'भो भगो अघो अपूर्वस्य योऽशि' इति रोर्यत्वे 'हलि सर्वेषाम्' इति यकारस्य हल् परत्वात् लोपे देवा यान्ति' इति सिध्यति ।

पुनारमते-(४७, ५०) पुनर्+रमते इति दशायां 'रोरि' इति रेफस्य लोपे 'ढ्रलोपे पूर्वस्य दीर्घोणः' इति नकारादकारस्य दीर्घे पुनारमते इति जातम् ।

हरी रम्यः-(४४, ४८, ४२) हरिस्+रम्यः इतिस्थिते 'ससजुषोरुः' इति सस्य रुत्वे 'रोरि' इति रेफस्य लोपे 'ढ्रलोपेपूर्वस्य दीर्घोऽणः' इति दीर्घे हरी रम्यः इति सिद्धम् ।

शम्भूराजते-(५१; ५८) शम्भुस्+राजते अत्र 'ससजुघोरुः' इत्यनेन रुत्वे उकारस्येत्संज्ञायां लोपे च शम्भुर राजते इति जाते तत्र रोरि इत्यनेन रेफस्य लोपे 'ढ्रलोपेपूर्वस्य दीर्घोऽणः' इत्यनेनोकारस्य दीर्घे शम्भू राजते इति भवति ।

मनोरथः–(४१, ४७, ४६, ५२, ६६) मनस्+रथः इत्यत्र 'ससजुषोरुः' इति सस्य रुत्वे कृते 'रोरि' हशि च' इत्युभयोः प्राप्तौ 'विप्रतिषेधे परं कार्यम्' इति सूत्रेण परत्वात् 'रोरि' इत्यस्यैव प्राप्ते 'पूर्वत्रासिद्धम्।' इति सूत्रेण 'रोरि' इत्यस्य त्रिपादिस्थत्वेन असिद्धत्वात् 'हशि च' इति उत्वे 'आद्गुणः' इति गुणे मनोरथः इति सिद्धम्।

एष विष्णुः–(५०, ५८) एतद्–सु विष्णुः इति दशायां 'त्यदादीनामः' इत्यनेन अकारान्तादेशे अतो गुणे इति पररूपे 'तदोः सः सावनन्त्ययोः' इत्यनेन तस्य सत्वे सस्य च षत्वे षषसु विष्णुः इति जाते अत्र सत्वं प्रबाध्य 'एतत्तदोः सुलोपोऽकोरनञ्समासे हलि इति सुलोपे एष विष्णुः इति सिद्धम् रूपम्।

एषको रुद्रः–(ई० ४३) एतत्तदोः सुलोपोऽकोरनञ्समासे हलि। इति सूत्रे 'अकोः' किमित्यस्य प्रत्युदाहरणमेतत्। तत्र हि एषक स् रुद्रः इति दशायां एतच्छब्दस्य सककारत्वान्न सुलोपः, किंतु 'ससजुषो रुः' इत्यनेन रुत्वे 'हशि च' इत्युत्वे 'आद्गुणः' इति गुणे एषको रुद्रः इति रूपम्। अकोरित्यस्याभावे तु अत्रापि सुलोपापत्तिः स्यादिति सूत्रे तद् ग्रहणमावश्यकम्।

अथ अजन्त पुँल्लिंग प्रकरणम्

रामान्–(४०, ५२, ५३) रामशब्दात् द्वितीया बहुवचन विवक्षायां शसि समागते 'लशक्वतद्धिते' इति शस्त्रेत्संज्ञायां लोपे च राम्+अस इत्यवशिष्टे अत्र 'प्रथमयोः पूर्व सवर्ण इथि पूर्व सवर्ण दीर्घादेशे विहिते रामास् इति जाते तस्माः च्छसोः नः पुंसि' इति सस्य नत्वे कृते रामान् इति रूपं जातम् ।

रामाय–(५१ ६८) राम शब्दात् चतुर्थेक वचनविवक्षायां ङे विहिते राम ङे इति जाते 'ङेर्यः' इत्यनेन ङे इत्यस्य स्थाने यकारादेशे कृते राम य इति । अत्र यकारे 'स्थानिवदादेशोऽनल्विधौ' इति स्थानिवद् भावेन सुप्त्वनानीय 'सुपि च' इत्यनेनादन्ङ्गतस्य दीर्घे 'अलोऽन्त्यस्य' इत्यनेन अन्त्यस्यातो जाते रामाय इति रूप सिद्धम् ।

रामाणाम्–(४७, ६९) राम शब्दात् षष्ठी बहुवचने आमि 'राम आम्' इति स्थिते ह्रस्वनद्यापोनुट् 'इति नुटि अनुबन्धलोपे 'नामि' इति दीर्घे 'अट् कुप्वाङ्नुम्व्यवायेऽपि' इति नस्य णत्वे रामाणाम् इति रूप सिद्धम् ।

रामेषु–(५०, ६९) रामशब्दात् सुपि राम सु इति स्थिते बहुवचने झल्येत्' इत्येत्वे 'आदेश प्रत्यययोः 'इति षत्वे रामेषु इति रूपम् सिद्धम् ।

सर्वे–सर्वशब्दात् प्रथमाबहुवचनविवक्षायां जसि समागते 'सर्वादीनि सर्वनामानि' इति सर्व शब्दस्य सर्वनाम सञ्ज्ञायाम् 'जसः शी' इति जसः स्थाने 'अनेकाल्शित्सर्वस्य' इत्यनेकालत्वत्सर्वादेशे सर्व शी । इति जाते लशक्वतद्धिते' इतीत्सञ्ज्ञायाम् लोपे च 'आद गुणः इति गुणे सर्वे इति रूपम् ।

सर्वस्मात्–(४८, ६९) सर्व शब्दात् ङसि विभक्तौ 'सर्वादीनि सर्वनामानि' इति सर्वनाम संज्ञायाम् 'ङसिङ्योःस्मात्स्मिनौ' इति ङसेः स्मादादेशे उक्तं रूपं सिद्धम् ।

सर्वेषाम्–(५०, ५२, ६८) सर्वशब्दात् षष्ठीबहुवचन विवक्षायां आमि 'सर्व आम्' इति स्थिते 'आमि सर्वनाम्नः सुट्' इति सुटि उटो लोपे, टित्वादाद्यावयवे सर्व स आम्' इति जाते 'बहुवचने झल्येत्' इत्यनेन वकारोत्तर [illegible]स्का-

रिस्यैत्वे "आदेशप्रत्ययोः" इति पत्वे च सर्वेषाम् इति रूपं निष्पन्नम् ।

निर्जरसौ—निर्जर शब्दात् प्रथमाद्विवचने औ समागते "जराया जरसन्यतरस्याम्" इत्यनेन 'जरसादेशे 'निर्जरसौ इति । न च सूत्रे जरा शब्दस्यैव जरसादेशः प्रोक्तो न तु निर्जरशब्दस्य, इति कथमत्र जरसादेश इति वाच्यम्, "पदाङ्गाधिकारे तस्य च तदन्तस्य च" इति परिभाषया तदन्तस्यापि तत्प्रवृत्तेः । नन्वेमपि "निर्दिश्यमानस्यादेशा भवन्ति" इति परिभाषया निर्दिश्यमानस्य जरा शब्दस्यैव जरसादेश प्रवृत्तिरिति चेन्मैवम्, 'एक देश विकृतमनन्यवत्" इति परिभाषया जर शब्दस्यापि जरसादेशविधानात् ।

पदः—(४५,६६) पादशब्दाच्छसि 'पद्दन्नोमास—' इति पाद शब्दस्य विभाषया पदादेशे सस्य रुत्वे विसर्गे पदः इति रूपम् निष्पन्नम् । पक्षे पूर्वसवर्ण दीर्घे "तस्माच्छसो नः—' इति नत्वे पदान् इति ।

विश्वपः—(४३, ५०, ५२, ६६) विश्वं पातीति विश्वपाः क्विबन्तः, तस्मात् शसि अनुबन्धलोपे विश्वपा + अस् इत्यवस्थायां "यचि भम्" इत्यनेन भ संज्ञा ततश्च "क्विबन्ता विडन्ता विजन्ताः क्विन्नन्ताश्च-धातुत्वं न जहतीति सिद्धान्तनुसारं क्विबन्तस्य धातुत्वेन "आतो-धातोः" इति अकारस्य लोपे पर संयोगे विश्वपस् इति, ततश्च सस्य रुत्वे "खरवसानयोर्विसर्जनीयः" इत्यनेन विसर्गे विश्वपः इति सिद्धम् ।

हरये—(६८) हरि शब्दात् ङे कृते "लशक्वतद्धिते" इति ङस्येत्संज्ञायां लोपे च "शेषो घ्यसखि" इति घिसंज्ञायाम् "घेर्ङिति" इति गुणे "एचोऽयवायावः" इति अयादेशे हरये इति रूपं निष्पन्नम् ।

सखा—(४१, ५१, ५३) सखि शब्दात् प्रथमैकवचने सौ "यस्मात्प्रत्यय—" इत्यङ्गसंज्ञायाम् "अनङ्सौ" इति 'ङिच्चे' ति सूत्रबलात् सखिशब्दान्तस्य इकारस्य अनङि अनुबन्धलोपे सखन् स इति जाते "आलोऽन्त्यात् पूर्व उपधा" इत्युपधा संज्ञायां "सर्वनाम स्थाने चाऽसम्बुद्धौ" इत्युपधायाः दीर्घं सखान् स् इति स्थितो "अपृक्त एकाल प्रत्ययः" इति सस्य अपृक्तसंज्ञायां "हल्ङ्याभ्यः—" इति स लोपे "न लोपः प्रातिपदि कान्तस्य" इति न लोपे सखा इति रूपं जातम् ।

सख्युः—(४४, ६८) सखिशब्दात् पञ्चम्येकवचनविवक्षायाम् ङसि समागते ङकारस्येत्संज्ञायां लोपे च सखि अस् इति स्थिते "इकोयणचि" इति यणादेशेसख् य् अस् इति जाते तत्र "ख्यत्यात्परस्य" इत्यनेन असोऽकारस्य उत्वे सख्युस्' इति, तत्र सस्य रुत्वे विसर्गे च कृते "सख्युः" इति रूपम्।

कति—(४५,५२) का संख्या परिमाणमस्येति विग्रहे इतिः कति इति तस्मात् वहुत्व विशिष्टवाचकात् उत्यन्तात् कति शब्दात् जसि शसि च विभक्तौ "वहुगणव तुऽतिसंख्या" इति संख्यासंज्ञा "इति च" इति षड्संज्ञायां "षड्भ्यो लुक्" इति जश्शसोलु'कि कति इति। न च जसि विभक्तो "प्रत्ययलोपे प्रत्यय लक्षणम्" इति हरिभाषया प्रत्ययलक्षणेन "जसि च" इत्यनेन इकारस्य गुणः कुतोनेति वाच्यम् "न लुमताङ्गस्य" इति प्रत्ययलक्षण निषेधात्।

वहुश्रेयस्यै—(६५) वहुश्रेयसी शब्दात् चतुर्थ्येकवचनविवक्षायां ङेः समागते "प्रथम लिङ्ग ग्रहणञ्च" इति वहु श्रेयसी शब्दस्य नदीसंज्ञा "आनद्याः" इति ङेः आडागमे टकारस्येत्संज्ञायां लोपे च "आद्यन्तौ टकितौ" इत्याद्यावयवेभूते ङकारस्येत्संज्ञायां लोपे च वहुश्रेयसी अ ए इति स्थिते "आटश्च" इति पूर्वपरमोः स्थाने वृद्धौ कृतायां "इको यणचि" इति यणि वहुश्रेयस्यै इति रूपम् जातम्।

वहुश्रेयस्याम्—(६८) वहुश्रेयसी शब्दात् सप्तम्येकवचने ङि विभक्तौ "प्रथम लिङ्ग ग्रहणं च" इति नदी संज्ञायां "ङेराम्नद्याम्नीभ्यः" इति ङेरामि "वहुश्रेयसी आम इति स्थिते स्थानिवद्भावेन ङित्वमादाय "आनद्याः" इत्यादि आटश्च इति वृद्धौ यणि उक्तं रूपं सिद्धम्। न च ङेरामि कृते "ह्रस्वनद्यापोनुट्" इति नुटि ततः 'यदागमाः' इति न्यायेन मामोऽप्याम् ग्रहणेन ग्रहणात् आट् कुतो नेति वाच्यम्, परत्वाटा नुटो वाध सम्भवात्। ननु परत्वात् नुटं प्रवाध्य कृतेप्याडागमे नुट् कुतो नेति चेन्न "विप्रतिषेधे यद्धाधितंतद्वाधितमेव" इति न्यायस्य जागरुकत्वात्।

क्रोष्टा—(४०, ४८, ५०) क्रोष्टु शब्दात् सौ अनुवन्ध लोपे "तृज्वत्क्रोष्टुः" इति तृज्वद्भावे कृते "ऋतोङिसर्वनामस्थानयोः "इति गुणे प्राप्ते तम्प्रवाध्य "ऋदुशनस्पुरुदंशोऽनेहसां च" इत्यनङि अनुवन्ध लोपे "अप्तृन्तृच-

इति उपधा दीर्घे "हल्ङ्याभ्यः" इति सुलोपे "न लोपः प्रातिपदिकान्तस्य" इति न लोपे क्रोष्टा इति निष्पन्नम् ।

क्रोष्टुः—(४१, ४२, ५३, ६९) क्रोष्टु शब्दात् ङसि विभक्तौ ङकारेकारयो इत्संज्ञायां लोपे च कृते "विभाषा तृतीयादिष्वचि" इत्यनेन तृज्वद्भावे क्रोष्टृ अस् इति स्थिते "ऋत इत्" इतिसूत्रेण पूर्वपरयोः ऋकाराकारयोः स्थाने उदादेशे रपरत्वे क्रोष्टुर्स् इति जाते "रात्सस्य" इति सलोपे रेफस्य विसर्गे क्रोष्टुः इति जातम् :

धातॄणाम्—(५२ ई०) धातृशब्दादामि "ह्रस्वनद्यापोनुट्" इति नुटि "नामि" इति दीर्घे ऋवर्णान्नस्यणत्वं वाच्यम्" इति णत्वे धातॄणाम् इति निष्पन्नम् ।

नृणाम—(६९) नृ शब्दादामि "ह्रस्वनद्यापोनुट्" इति नुटि अनुवन्ध लोपे नृ नाम इति स्थिते "नामि" इति सूत्रं प्रवाध्य "नृ च" इति विभाषया दीर्घे "ऋवर्णान्नस्यणत्वं वाच्यम्" इति णत्वे नृणाम् इति । अत्र "नामी, ति दीर्घस्तु न "सकृद्गतौ यद्वाधितं तद्वाधितमेवे, ति न्यायस्य जारुकत्वात् ।

गाः—(४९) गो शब्दात् शसि अनुवन्ध लोपे "औतोऽम्ससोः" इति गो शब्दस्य ओकारस्य विभक्तेरकारस्य च आकोरेकादेशे सस्य रुत्वे विसर्गे गाः' इति सिद्धम् ।

राः—(४९) रैशब्दात् सौ विभक्तौ "रायो हलि" इति रैशब्दस्य ऐकारस्य आकारादेशे सस्य रुत्वे विसर्गे राः इति निष्पन्नम् ।

इति अजन्तपुल्लिङ्गप्रकरणम्

—*—

(अथ अजन्तस्त्रीलिङ्गप्रकरणम्)

सर्वस्याम्—सर्वाशब्दात् ङे विभक्तौ "ङेराम्नद्याम्नीभ्यः" इत्यनेन ङेरामि सर्वा आम् इति स्थिते "सर्वनाम्नः स्याड्ढ्रस्वश्च" इत्यनेन स्याटि आवन्तस्य ह्रस्वत्वे च जाते सर्वस्या आम् इति जाते "अकः सवर्णे दीर्घः" इत्यनेन दीर्घे सर्वस्याम् इति सिद्धम् ।

हे अम्ब—(४०) अम्वा शब्दात् सम्बोधन विवक्षायां सौ "अम्वार्थनद्योर्ह्रस्वः" इति ह्रस्वत्वे सुलोपे हे अम्व इति ।

मत्यै—(५२, ६५) मति+ए' अत्र ङिति ह्रस्वश्च इतिनदी संज्ञायां "आण्नद्याः" इत्याडागमे टित्वादाद्यावयवे मति–आ ए' इति जाते "आटश्च" इति वृद्धौ सत्वाम् ऐ' इति भूते "इको यणचि" इति यणि कृते मत्यै इति रूपम् । नदी संज्ञा भावे "शेषोव्यसखि" इति घि संज्ञायाम् 'घेर्ङिति" इति गुणे कृते "एचोऽयवायावः" इत्य यादेशे मतये इति रूपम् सिद्धम् ।

मत्याम्—(४०, ६९) मतिशब्दात् ङि विभक्तौ "ङिति ह्रस्वश्च" इति नदी संज्ञायां "इदुद्भ्याम्" इति ङेरामि कृते स्थानिवद्भावेन ङित्वमादाय "आण्नद्याः" इत्यादि "आटश्च" इति वृद्धौ "इको यणचि" इति मणि मत्याम् इति । नदी संज्ञाभावे "शेषो घ्यसखि" इति घिसंज्ञायां "अच्चघेः" इति ङेरोत्त्वे घेरकारादेशे च कृते "वृद्धिरेचि" इति वृद्धौ मतौ इति रूपं जायते ।

तिसृणाम्—(४०, ४२, ४६, ४७, ५३, ६८) त्रिशब्दादामि "विभक्तौ त्रिचतुरोः स्त्रियाम् तिसृचतसृ" इति त्रिशब्दस्य तिरत्रादेशे तिसृ आम इति स्थिते "नुमचिरतृज्वद्भावेभ्यो नुट्पूर्वं विप्रतिषेधेन" इत्युक्त्या अचिर ऋत इति प्राप्ते रेफादेशं बाधित्वा "ह्रस्वनद्यापोनुट्" इति नुटि अनुबन्धलोपे "नामि" इति दीर्घे प्राप्ते "न तिसृचतसृ" इति निषेधे "ऋवर्णान्नस्यणत्वं वाच्यम्" इति णत्वे तिसृणाम् इति ।

स्त्रियै—(५०) स्त्री शब्दात् ङे विभक्तौ 'यूस्त्र्याख्यौ नदी" इति नदी संज्ञायाम् "आण्नद्याः" इत्यादि "आटश्च" इति वृद्धौ "स्त्रियाः" इति इयङि अनुबन्धलोपे स्त्रियै इति ।

श्रीणाम्—(५२, ६८) श्री+आम् इति स्थिते अत्र "यूस्त्र्याख्यौ नदी" इति नदी संज्ञायां प्राप्तायां "नेयङुवङ्स्थानावस्त्री" इति निषिद्धे "वामि" इति वा नदी संज्ञायां "ह्रस्वनद्यापोनुट्" इति नुटि पर्जन्यवल्लक्षणन्यायेन दीर्घे "अट कुप्वाङ्नुम्व्यवायेऽपि" इति णत्वे श्रीणाम् इति । नदीत्वाभाव पक्षे इयङि श्रियाम् इति ।

स्वसा—(४७) स्वसृशब्दात् सौ "ऋन्नेभ्यो ङीप्" इति ङीणिप्राप्ते "न षट्स्व स्त्रादिभ्यः पञ्चम्यः" इति तन्निषेधे "ऋदुशनस्पुरुदंशोऽनेहसां च" इत्यङि अनुबन्ध लोपे स्वसम् स इति जाते "अप्तृन्तृच..." इति दीर्घे हल्ङ्याब्भ्यो यादि लोते "न लोपः—प्राति पादिकान्तस्य" इति न लोपे स्वसा इति ।

स्वसा तिस्रश्चतस्रश्च ननान्दा दुहिता तथा।
माता मातेति सप्तैते स्वस्रादय उदाहृताः ॥

इत्यजताः स्त्रीलिङ्गाः

——*——

(अथ अजन्तनपुंसकलिङ्गाः)

ज्ञाते—(६५) ज्ञानऔ इत्यत्र "नपुंसकाच्च" इत्यौकारस्य शीत्वे शस्येत्संज्ञायां लोपे च ज्ञानई' इति जाते "यचिभम्" इति भसञ्ज्ञायां "यस्येति च" इति अकारलोपे प्राप्ते "औङः श्यां प्रतिषेधो वाच्यः" इति निषिद्धे "आद गुणः" इति गुणे च कृते ज्ञाने इति रूपं निष्पन्नम् ।

ज्ञानानि—(३४, ६६) ज्ञानशब्दात् जश्शोर्विषये "जश्शसोः सिः" इत्यनेन अनेकालत्वाज्जश्शसोः शित्वे कृते" शिसर्वनामस्थानम्" इत्यनेन शि इत्यस्य सर्वनामस्थानसंज्ञायां "नपुंसकस्य झलचः" इति नुमि "मिदचोऽन्त्यात्परः" इति योगेनान्त्याजरूपस्य नस्यान्त्यावयवीभूते उकारमकारयोरित्संज्ञायां लोपे च ज्ञानम् शि' इति स्थिते शकारस्येत्संज्ञा लोपयोः "सर्वनामस्थानेचाऽसम्बुद्धौ" इत्यनेन नान्तोपधायाः दीर्घे ज्ञानानि इति सिद्धम् ।

श्रीपाय—(५२) श्रीपा शब्दात् ङे विभक्तौ "ह्रस्वो नपुंसके प्रातिपदिकस्य" इति ह्रस्वत्वे 'ङेर्यः" इति ङेर्मदिशे "सुपि च" इति दीर्घे श्रीपाय इति रूपं जातम् ।

वारिणे—(४२, ५२, ६८) वारि शब्दात् चतुर्थ्येकवचने वारिए इति दशायां "शेषोव्यसरिव" इति घिसंज्ञायां "घेर्ङिति" इति गुणे प्राप्ते "वृद्ध्यौत्वतृज्वद्भावगुणेभ्योनुम्पूर्वविप्रतिषेधेन" इति पूर्वं विप्रतिषेधस्य प्रवलत्वात् "इकोऽचि विभक्तौ" इति नुमि 'अट्कुप्वाङ्नुम्व्यवायेऽपि" इतिणत्वे वारिणे इति रूपं जातम् ।

दध्ना—(४७, ६९) दधिटा इत्यवस्थायां "इकोऽचि विभक्ताविति" नुमिप्राप्तेऽपवादत्वाद्बाधित्वा "अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः" इत्यनङादेशेऽन्तादेशे इकारे अनङादेशेन दधन्+आ इति स्थितौ "अल्लोपोऽनः" इत्यकारलोपे सति दध्न् आ इति जाते परेण संयोगे 'दध्ना' इति भवति रूपम् ।

दध्ने—(४४) दधिशब्दात् ङे विभक्तौ "अस्थिदधि " इत्यङि भत्वाद् "अलोपोऽनः" इत्यल्लोपे दध्ने इति रूपं सिद्धम् ।

दध्नि-दधनि—(३०, ४०, ६८) दधिशब्दात् सप्तम्यां ङौ "अस्थिदधि…" इत्यनेन अनङि "विभाषाङिश्योः" इति ङौ अकार लोपस्य वैकल्पिकेनाकारलोपाभावे दधनि रूपमितिसाधु । सति चाकार लोपे दध्नि इति रूपं सिद्धं भवति ।

प्रराभ्याम्—प्रकृष्टो रा = धनं यस्येति वहुव्रीहौ प्ररैशब्दः । तस्य नपुंसकह्रस्वत्वे इकारे प्ररि' इति । तस्मात् प्ररिशब्दात्भ्यामि "एकदेशविकृतमनन्यवत्" इतिपरिभाषावलात् "रायोहलि' इत्यनेन सूत्रेण आत्वे प्रराभ्याम्' इति सिद्धम् ।

इत्यजन्तनपुंसकलिङ्गप्रकरणम्

——

(अथ हलन्तपुंल्लिङ्गाः)

८० धुक—(४८, ६५) दुह प्रपूरणे क्विप् । क्विन्तत्वात्प्रातिपदिकसंज्ञायां सत्यां सावागते उकार लोपे दुह स्' अत्र "हल्ङ्याभ्यो—" इति स लोपे हस्य 'होढः" इति ढत्वे प्राप्ते तं वाधित्वा "दादेर्धातोर्घः" इति घत्वे "एकाचोवशोभष्झषन्तस्य स्ध्वोः" इति दस्य फत्वे धुध इति जाते तत्र "झलां जशोऽन्ते" इति जश्त्वेन गकारे "वाऽवसाने" इति विकल्पेन चर्त्वे धुक्, धुग्, इति भवतः ।

विश्वौहः—(३३, ६८) विश्ववाह शब्दाच्छसि शस्येत्संज्ञायाम् लोपे च "यचिभम्" इति भसंज्ञायां "वाहऊठ" इत्यनेन "इग्यणः सम्प्रसारणम्" इति वलात् व रूपस्य यणः स्थाने अकाररूपे सम्प्रसारणे पूर्वरूपे च कृते विश्व अह अस इति जाते "एत्येधत्यूट्सु' इति पूर्वपरयोः स्थाने वृद्धौ सकारस्य रुत्वे विसर्गे विश्वौहः इति रूपं सिद्धम् ।

अनड्वान्—(४०, ४७, ५२, ६८) अनडुहशब्दात् प्रथमैकवचने 'चतुरनडुहोरामुदात्तः" इत्यनेन आमि अनुवन्धलोपे अनडु आह सु इति दशायां "सावडुहः" इत्यनेन नुमि अनुवन्धलोपे "इकोयणचि" इति यणि अनड्वान्हस् इति दशायां हल्ङ्यादिना स लोपे "संयोगान्तस्य लोपः" इत्यनेन सूत्रेण हका-

रस्य लोपे अनड्वान् इति सिद्धम् । अत्र सुलोपस्याऽसिद्धत्वान्नलोपो नेति बोध्यम् ।

चतुर्ण्णाम्—(४१, ५२, ६९) चतुर शब्दादामि विभक्तौ चतुर् आम् इति स्थिते "षट्चतुर्भ्यश्च" इति नुटि अनुबन्ध लोपे "रषाभ्यां नोणः समानपदे" इत्यनेन णत्वे "अचोरहाभ्यांद्वे" इत्यनेम द्वित्वे चतुर्ण्णाम् इति सिद्धम् । द्वित्वाभावे चतुर्णाम इति भवति ।

आभ्याम्—(४३, ४६, ५३) इदम् शब्दात्भ्यामि विभक्तौ "त्यदादीनामः" इति अत्वे "अतो गुणे इति पररूपे इदभ्याम् इति जाते "हलि लोपः" इत्यसेन इदभागस्य लोपे प्राप्ते "अलोऽन्त्यस्य" इत्यनेनान्त्यस्य दस्य लोपे प्राप्ते "नानर्थकेऽलोन्त्यविधिरनभ्यासविकारे" इति परिभाषया अलोन्त्यविध्यभावे इद्भागस्यैव लोपे अ+भ्याम् इति जाते "सुपि च" इति दीर्घत्वे प्राप्ते परन्त्वत्र विद्यमानस्याकरस्यादन्तत्वं वर्तते नवेति शङ्कायाञ्चै आद्यन्तवदेकस्मित्" इति एकस्मिन्नेवाकारे अन्तवद्भावेन अदन्तत्वं मत्वा दीर्घे कृते आभ्याम् इति निष्पन्नम् ।

राज्ञः—(६५) राजन्+शस् इति स्थिते शस्येत्सञ्ज्ञायां लोपे च कृते "यचिभम्" इतिभसंज्ञायां "अल्लोपोऽनः" इति आनोऽकारस्य लोपे "स्तोःश्चुनाश्चुः" इति नस्य जत्वे "जयोर्ज्ञः" इति ज्ञरूपसंयुक्ते राज्ञः इति रूपम् ।

राजभ्याम्—(४१, ४७) राजन्भ्याम् इति स्थिते "स्वादिष्वसर्वनामस्थाने" इति पदत्वात् "न लोपः प्रातिपदिकान्तस्य" इति न लोपे राजभ्याम् इति स्थिते "सुपि चे' ति दीर्घे प्राप्ते "न लोपः सुप्स्वरसंज्ञातुग्विधिषु कृति" इति नलोपस्याऽसिद्धत्वात् दीर्घाभावे राजभ्याम् इति सिद्धम् ।

वृत्रघ्नः—(४०, ४१, ५०) वृत्रहन् शब्दात् शसि विभक्तौ अत्र शस्येत्संज्ञायाम् लोपे च "यचिभम्" इति भसंज्ञायां "अल्लोपोऽनः" इत्योऽकारस्य लोपे वृत्रहन् अस् इति स्थिते "होहन्तेर्ज्णिन्नेषु" इत्यनेननकारे परे हकारस्य कुत्वेनघकारे सस्य रुत्वे रेफस्य विसर्गत्वे च कृते मिलित्वा वृत्रघ्नः' इति रूपम् ।

यूनः—(४१, ४२, ५३) युवन् शब्दात् शसि "यचिभम्" इति भसंज्ञायां "श्वयुवमघोनामतद्धिते" इति वकारस्य सम्प्रसारणे "सम्प्रसारणाच्च"

इति पूर्वरूपे युडन् अस् इति दशायां यकारस्यापि "श्वयुवमघोनानामतद्धिते" इति सम्प्रसारणे प्राप्ते "न सम्प्रसारणे सम्प्रसारणम्" इति तन्निषेधे सवर्ण-दीर्घे सस्य रुत्वे विसर्गे यूनः इति रूपं जातम् ।

पन्थाः—(४६, ४७, ६६, ६५) पथिन् शब्दात् सौ "पथिमथ्यृभुक्षा-मात्" इति आत्वे "इतोत्सर्वनामस्थाने" इति थकारोत्तरवर्तिनः इकारस्य अकारे "थोन्थः" इति थकारस्य न्थादेशे "अकः सवर्णे दीर्घः" इति दीर्घे सस्य रुत्वे पन्थाः इति रूपं निष्पन्नम् ।

अष्टौ—(४१, ४२, ६८) अष्टन् शब्दात् जसि शसि च विभक्तौ अनुबन्ध-लोपे अष्टन्+अस् इति स्थिते "अष्टन आ विभक्तौ" इत्यनेन अष्टनोनकारस्य आत्वे अष्ट आ अस इति स्थिते सवर्ण दीर्घे "अष्टाभ्य औश्" इत्यनेन औशि अनुबन्धलोपे "वृद्धिरेचि" इति वृद्धौ अष्टौ इति सिद्धम् । ननुहलादावात्वस्य विधानेन कथमत्र अजादावात्वमिति चेन्न, एकमात्रालाघवेन "अष्टभ्य औश्" इति वक्तव्ये अष्टाभ्य इति दीर्घोच्चारणं क्वचिदजादावपि "अष्टन आ विभक्तौ" इति सूत्रविहितमात्वं भवतीति ज्ञापनेनादोषात् ।

त्वम्—(६५) युस्मद्+सु इत्यत्र "ङेप्रथमयोरम् इति सोरमादेशे विहिते युस्मद्+अम् इति जाते "त्वाहौ सौ" इति युस्मदो मपर्यन्तस्य त्वादेशे विहिते त्व अद् अम् इति जाते "अतो गुणे" इतिपररूपत्वे कृतेत्वम् इति रूपम् ।

आवाम्—(३०, ६८) अस्यच्छब्दात् प्रथमाद्विचने "अस्मद् औ" इति स्थिते "ङे प्रथमयौरम्" इत्यनेन औकारस्य स्थाने अमि "युवावौद्विवचने" इति अस्मदो मपर्यन्तस्य आवादेशे आव अद् अम् इति स्थिते "अतो गुणे" पर-रूपे आवाद् अम् इति दशायां "प्रथमायाश्चद्विवचनेभाषायाम्" इत्यनेन दका-रस्यात्वे आव आ अम् इति जाते "अकः सवर्णेदोर्घः" इति सवर्ण दीर्घे आवा अम इति स्थिते 'अमिपूर्वः" इतिपूर्वरूपे आवाम् इति सिद्धम् ।

युस्मान्—(४१, ५१, ५२) युष्मच्छब्दाच्छसि युस्मद् अस् इति स्थिते "द्वितीयायां च" इत्यनेन अन्त्यस्यद् मात्रस्य आकारे सवर्णदीर्घे "शसो न" इत्यनेन "आदेः परस्ये, ति सहकाराच्छसोऽकारस्य नादेशे "संयोगान्तस्ये' ति सलोपे युस्मान् इति रूपं सिद्धम् ।

प्राचः—(५०) प्रपूर्वात् अञ्च् धातोः "ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजि-क्रुञ्चां च" इति सूत्रेण क्विनि "लशक्वतद्धिते" इति क्विनः ककारस्य "हलन्त्यम्" इति नकारस्य च इत्संज्ञायां लोपे चकृते इकारस्योच्चारणार्थत्वेन तस्मिन्नपिगते "वेरपृक्तस्य" इति वकारस्यापि लोपे कृते क्विनः सर्वापहारे प्रअञ्च इति स्थिते "अनिदितां हल उपधायाः क्ङिति" इत्युपधानकार लोपे "कृतिङ" इति क्विः कृत्संज्ञकत्वात् प्र अच् इत्यस्य "कृतद्धितसमासाश्च" इति कृदन्तत्वात् प्रातिपदिक संज्ञायां शसि अनुबन्धलोपे प्रअच् अस इति स्थिते "यचिभम्" इति भसंज्ञायां अचः इत्यनेनाकारस्य लोपे "चौ" इति दीर्घे सकारस्य रुत्वे विसर्गे प्राचः इति जातम्।

महान्—(६५) महत् सु इत्यत्र सकारोत्तरवर्त्युकारस्येत्संज्ञायां लोपे च "हल्ङ्याभ्यो…" इति सस्य लोपे "उगिदचाम् " इति नुमि उमो लोपे मित्वात् 'मिदचोऽन्त्यात्परः" इत्यन्त्यादचः परे जाते महन्त् इति स्थिते "सान्तमहतः संयोगस्य" इत्युपधाया दीर्घत्वे "संयोगान्तस्य लोपः इतितलोपे महान् इति।

पिपठीष्षु—(४०, ४१, ४२, ५३) पिपठिस्+सुप् अत्र "हलन्त्यम्" इति पकारस्येत्संज्ञायां "तस्य लोपः" इति लोपे "स्वादिस्वसर्वनामस्थाने" इति पद संज्ञायां "ससजुषोरुः" इति सस्य रुत्वे उकारलोपे "र्वोरुपधायादीर्घ-इकः" इत्युपधायाः दीर्घत्वे 'खरवसानयोर्विसर्जनीयः" इति रेफस्य विसर्गत्वे पिपठीः सु इति जाते "विसर्जनीयस्य सः" इति विसर्गस्य सत्वे "नुम्विसर्जनीय-शर्व्यवायेऽपि" इति शर्व्यवायेऽपि सुप् प्रत्ययस्य षत्वे "ष्टुनाष्टुः" इति पूर्वस्य सकारस्य षत्वे पिपठीष्षु इति रूपं जातम्।

पुमान्—(३५, ६५) पुंस् शब्दात् सौ, पुम् सु इत्यत्र "पुंसोऽसुङ्" इत्यसुङि विहिते "ङिच्च" इति अन्तिमसकारस्य स्थाने जाते पुमसुङ्+सु इतिभूते "हलन्त्यम्" इति उकारस्य "उपदेशेऽजनुनासिक इत्" इयि उकारस्य चेत्संज्ञायां "तस्य लोपः" इति उभयोङ्कारोकारयोर्लोपे पुमस्+सु इति स्थिते सोर्हल्ङ्यादिना लोपे प्रत्यय लक्षणे "उगिदचाम्" इति नुमि उभिगते मित्वादन्त्यादचः परे "सान्तमहतः संयोगस्य" इति उपधादीर्घे संयोगान्त लोपे पुमान इति रूपं जातम्।

पुंसु—(४४) पुंस् शब्दात् सुपि "स्वादिष्विति" पदत्वात् संयोगान्त लोपे निमित्ताऽपायादनुस्वारस्यापिनिवृत्तौ 'तश्च' इत्यनुस्वारे पुंस इति सिद्धम् ।

अमुम्—(५३) असस् शब्दात् अमि त्यदाद्यन्ते पररूपे "अमिपूर्वः" इति पूर्व रूपे "अदसोऽसेदीदुदो मः" इति अकारस्य उत्वे दस्य च मत्वे अमुम् इति रूपं सिद्धम् ।

अमुना—(६८) अदस् शब्दात् टा विभक्तौ "त्यदादीनामः" इत्यनेन अत्वे "अतोगुणे" इत्यनेन पररूपे "अदसोऽसेर्दादुमः" इत्यनेन अकारस्य उत्वे दस्य च मत्वे अमु+आ इति जाते नाभावे कर्तव्ये "नमुने" इत्यनेन मुत्वस्यासिद्धत्वाभावबोधनात् "शेषोघ्यसखि" इत्यनेन घिसंज्ञायाम् "आङोनाऽस्त्रियाम्" इत्यनेन टा इत्यस्य नादेशे अमुना इति सिद्धम् । न च मुत्वस्या सिद्धत्वात् "सुपिच" इति दीर्घः स्यादिति वाच्यम् "नमुने" इत्यनेन कृते च नाभावे नासिद्धत्व मित्यस्यापि बोधनात् ।

अमीषाम्—(३४) अदस् शब्दात् आमित्यदाद्यत्वे पररूपत्वे च कृते "आमिसर्वनाम्नः सुट्" इति सुटि अनुबन्धलोपे "बहुवचनेझल्येत्" इति एत्वे "आदेशप्रत्ययोः" इति षत्वे "एत ईद्बहुवचने" इत्येकारस्य ईत्वे दस्य चमत्वे अमीषाम् इति रूपं निष्पन्नम् ॥

इति हलन्तपुल्लिङ्ग प्रकरणम्

———

(अथ हलन्त स्त्रीलिङ्गप्रकरणम्)

उपानत्—(४७, ६९) उपानह् शब्दात् सौ उपानह+सु इति स्थिते सोरूकारे गते "स्" इत्यस्य "हल्ङ्याब्भ्यो दीर्घात्…" इति लोपे "नहोधः" इति हकारस्य धत्वे 'झलां जशोऽन्ते" इति धकारस्य दत्वे "वावसाने" इति चर्त्वे उपानत् इति रूपं जातम् । चर्त्वाऽभावे उपानद्' इति ।

इयम्—(४४, ५२, ६८) इदम् शब्दात् सौ इदम्+सु इति जातेऽनुबन्ध लोपे "य सौ" इति दस्य स्थाने यकारादेशे कृते इयम्+स इति जाते "त्यदादीनामः" इत्यनेनाकारादेशे प्राप्ते तं बाधित्वा "इदमो मः" इति मकारस्य मकारादेशे "हल्ङ्याब्भ्यो दीर्घात्०" इति स लोपे इयम् इति सिद्धम् ।

✓ अनया—(३९) इदम् शब्दात्-तृतीयैक वचने त्यदाघत्वे पररूपत्वे टापि-अनुवन्ध लोपे सवर्ण दीर्घे "अनाप्यक:" इति इद्भागस्य अनादेशे "आङि-चाप:" इत्यावन्तस्ये कारे "एचोऽपवायाव:' इत्यैकारस्य आयादेशे अनया इति।

अस्या:—(३०, ६८) इदम् शब्दात्ङसि अत्वे पररूपत्वे टापि सवर्ण-दीर्घे "सर्वनाम्न: स्याड्ढ्रस्वश्च" इति स्याटि आपो ह्रस्वे च कृते इदस्या अस् इति जाते सवर्णदीर्घे "हलि लोप:" इतीद् भागस्य लोपे सस्य रुत्वे विसर्गे अस्या: इति रूपं निष्पन्नम्।

अद्भि:—(४०, ४६, ५३, ६५) अप् शब्दात् भिसि अप्+भिस् इत्यत्र "अपोभि:" इत्यनेन अप: पकारस्य तकारे "झलां जशोऽन्ते" इति तस्य दत्वे सस्य रुत्वे रेफस्य विसर्गत्वे च कृते अद्भि: इति रूपं सिद्धम्।

चतसृणाम्—(३९) चतुर शब्दात्-आमि "चिचतुरो: स्त्रियां तिसृ चतसृ" इति चतसृ आदेशे चतसृ आम् इति जाते "अचिर ऋत:" इति ऋका-रस्य रेफादेशे प्राप्ते "नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन" इति पूर्व विप्रतिषेधेन तं वाधित्वा "ह्रस्वनद्यापो नुट्" इति नुटि जाते चतसृ नाम् इति स्थिते "नामि" इत्यनेन दीर्घे प्राप्ते "न तिसृचतसृ" इति निषेधे "ऋवर्णान्न-स्यणत्वंवाच्यम्" इति वार्तिकेनणत्वे चतसृणाम् इति सिद्धम्।

दृक्—(३२) दृश शब्दात् सौं हल्ङ्यादिलोपे "व्रश्चभ्रस्जसृजमृ० ॥ इतिषत्ते षस्यै झलां जशोऽन्ते" इति डत्वे "क्विन् प्रत्ययस्यकु: ॥ इति डका-रस्य कुत्वे गकारे तस्य "वाऽवसाने" इति चर्त्वे दृक् इति कत्वाऽभाये दृग् इति।

अमूभ्याम्—(४०) अदस् शब्दात् भ्यामि अत्वे पररूपत्वे टापि सवर्णे "अदसोऽसेर्दादु दोम:" इति उत्वेमत्वे च जाते अमूभ्याम्' इति रूपं जातम्।

अमुष्यै—(३४) अदस्शब्दात् ङविभक्तौ अत्वे पररूपत्वे टापि सवर्णदीर्घ 'अदाए इति स्थिते "सर्वनाम्न: स्याड्ढ्रस्वश्च" इति स्याटि आवन्तस्य ह्रस्वे चकृते वृद्धिरेऽचि इति वृद्धौ "अदसोऽसेर्दादुदोम:" इत्युत्वे मत्वे च विहिते "आदेशप्रत्यययो:" इतिषत्वे अमुष्यै इतिरूपं निष्पन्नम्।

इति हलन्तस्त्रीलिंगप्रकरणम्

(अथ हलन्तनपुंसकलिंगप्रकरणम्)

चत्वारि—(३४) चतुर् शब्दात् जशि शशिवा विभक्तौ "जश्शसोःशिः" इतिश्यादेशे "शिसर्वनामस्थानम्" इति सर्वनामस्थानसंज्ञायाम् "चतुरनडुहोरामुदात्तः" इत्यामि अनुवन्धलोपे "इकोमणचि" इति मणि चत्वारि इति रूपं जातम् ।

एनत्—(४०) इदम् शब्दात् सौ "अन्वादेशे नपुंसके एनद् वक्तव्यः" इति वार्तिकेन इदमशब्दस्य एनदादेशे "स्वमोर्नपुंसकात्" इति सोर्लुकि जश्त्वे चर्त्वे एनत् इति । चर्त्वाऽभावे एनद् इति ।

गोचा—(४) गामञ्चतीति विग्रहे क्विनिक्विनः सर्वापहारे उपपद समासे सुब्लूकि समत्वात् प्रातिपदकसंज्ञायाम् टा विभक्तौ अनुवन्धलोपे गो अञ्च आ इति जाते "अनिदितां हल उपधायाः क्ङिति" इति न लोपे "यचिभम्" इति भसज्ञायां "अचः" इत्यलोपे गोचाइति । पूजायान्तु "नाञ्चेः पूजायाम्" इति न लोपे निषवे सति "अवङ् स्फोटायनस्य" इत्यवाङि सवर्णदीर्घे गवाञ्चा इति अवङाभावपक्षे "सर्वत्रविभाषा गोः इति प्रकृतिभावे गो अञ्चा इति । प्रकृतिभावाभावपक्षे "एङः पदान्तादति" इति पूर्वरूपे गोऽञ्चा इति ।

ददन्ति—(६५, ६६) ददत्+जस अत्र "जश्शसोः शिः" इति जसः स्थाने सौ कृते शस्येत्संज्ञायां लोपे च 'शिसर्वनाम स्थानम्" इति सर्वनाम स्थानसंजायां "नतुंसकस्य झलचः इतिनुमिप्राप्ते "नाभ्यास्ताच्छतुः" इति निषिद्धे "वा नपुंसकस्य" इति विकल्पेन नुमि डमिगतेभिगतेभित्वादन्त्यादचः परे "नश्चापदान्तस्य झलि" इति अनुस्वारे "अनुस्वारस्य मपि परसवर्णे ददन्ति इति रूपम् सिद्धम् । नुमभावे ददतिऽति जायते ।

तुदन्ती—(४३, ५०, ५२) तुदत् -शब्दात् औ विभक्तौ "नपुंसकाच्च" इति औङ श्यादेशे अनुवन्ध लोपे तुदत् ई इति स्थिते "आच्छीनद्योर्नुम्" इति नुमि अनुवन्धलोपे नस्यानुस्वारे परसवर्णे च कृते तुदन्ती इति । नुमभावे तुदती इति ।

पचन्ती—(४४, ४६, ५१, ५३, ६८) पचत्+और इत्यत्र "नपुंसकाच्च" इति औस्थानेश्योदेशे शस्येत्संज्ञायां लोपे च "शप्श्यनोर्नित्यम् इति नुमिडमि

गते भित्वादन्त्यादचः परे अनुस्वारे परसवर्णे च कृते, कृते च संयोगे पचन्ती इति रूपं निष्पन्ननम् ।

घनूंषि—(६८) धनुष शब्दात् जश्शसोर्विषये धनुष+अम् इतिस्थिते "जश्शसोः शिः" इति शीकृते अनुबन्ध लोपे "शि सर्वनामस्थानम्" इत्यनेन सर्वनामस्थानसंज्ञयां नपुंसकस्य झलचः 'इतिनुति अनुबन्धलोपे "सान्तमहतः संयोगस्य" इत्यनेन सात्तसंयोगस्य उपधाया दीर्घे "नश्चापदान्तस्य झलि" इत्यनुस्वारे "नुम्बिसर्जनीयशर्व्यवायेऽपि" इति सस्यषत्वे संयोगे चकृते धनूंषि इति जातम् ।

पयांसि—(२५) पयस् शब्दाज्जसि "जश्शसोः शिः, इतिश्यादेशे अनुबन्ध-लोपे "शिसर्वनामस्थानमृस्थानम्" इति सर्वनामस्थानसंज्ञायाम् नपुंसकस्य झलचः" इतिनुमि अनुबन्ध लोपे 'सान्तमहतः संयोगस्य" इतिसान्तसंयोग-स्योपधाया दीर्घे ''नश्चापदान्तस्य झलि" इत्यनुस्वारे पयांसि इति रूपं सिद्धम् ।

सुपुमांसि—(५०, ५२) सुपुंस शब्दाज्जसि " जश्शसोः शिः" इति जसंः स्थानेश्यादेशे अनुबन्धलोपे "शिसर्वनाम स्थानम्" इति सवंनामस्थानसंज्ञायां "पुंसोऽसुङ" इत्यसुङि अनुबन्धलोपे सुपुमस् इति स्थिते "नपुंसकस्य झलचः" इति नुमि अनुबन्धलोये "सान्तमहतः संयोगस्य" इति दीर्घे नस्यानुस्वारे "सुपु-मांसि" इति जातम् ।

इतिहलन्तनपुंसकलिङ्ग प्रकरणम्

——*——

(अथाऽव्ययप्रकरणम्)

स्मारं स्मारम्—(५३) स्मृत्वा स्मृत्वा इत्यर्थः । अत्र "आभीक्ष्ण्येण-मुलच" इति स्मृधातोर्णमुल 'अचोञ्णिति इति वृद्धिः रपरत्वम 'नित्यवीप्स-योः" इति द्वित्वम् "कृन्मेजन्तः" इति मान्त कृदन्तत्वादव्ययत्वम्, सोलुंक् चोक्त रूपं जातन् ।

उदेतोः (२४) उतपूर्वादिण्धातो "भावलक्षणे स्थेणकृञ् वदिचरिहुत-मिजनिभ्यस्तोसुन्" इति तोसुन् प्रत्ययेऽनुबन्धलोपे गुणे उपसर्ग सम्बन्धिनस्तस्य जश्त्वे 'उदेतोस्' इत्यस्य तोसुन् प्रत्ययान्तत्वेन "क्त्वातोसुन्कसुनः" इत्यनेन

अव्ययसंज्ञायां "अव्ययादाप्सुपः ॥ इत्यनेन तस्माद्विहितस्य सोलु'कि सकारस्य रुत्वे विसर्गे उदेतोः इति ।

ऽत्र शालायाम्—(५२) तत्रेत्यस्य अव्ययत्वात् "अव्ययादाप्सुपः" इति आपो लुक् । स्त्रीत्वबोधनाय प्रकृते शालायाम्' इत्युक्तम् ।

अत्युच्चैसौ—(४६) उच्चैरतिक्रान्तः इति विग्रहे "अत्यादयः क्रान्ताद्यर्थेद्वितीयया" इति समासः । अत्र समासाद्विहितस्य सुपः अव्ययभूतादुच्चैश्शब्दात् परत्वेऽपिततो विहितत्वाऽभावात् "अव्ययादापसुपः" इति नलुक् । अत्युच्चैरिति समुदायस्य तु नाव्ययत्वम्, स्वरादिगणे उच्चैश्शब्दस्य केवलस्य पाठात् । ननु स्वारादिगणे केवलोच्चैश्शब्दस्त पाठेऽपि तदन्तविधिना "स्वरादिनियातमव्ययम्" इत्यनेन अत्पुच्चैश्शब्दस्याऽपि अव्यय संज्ञा कुतो नेति चेन्न, "गौणमुख्ययोर्मुख्येकार्यसम्प्रत्ययः" इति न्यायस्व जागरुकत्वात् ।

अव्ययलक्षणम्—(२५, ६५, ६६)

सहशंत्रिपु लिङ्गेषु सर्वासु च विभक्तिपु ।
वचनेपु च सर्वेपु यन्नव्येति तदव्ययम् ॥

त्रिपु लिङ्गेषु, सर्वासु विभक्तिपु, च सर्वेसु वचनेपु च यत् न व्येति=विकारं न प्राप्नोति, किन्तु सहशम्=एक प्रकारकम् एव भवति, तद् "अव्ययम्" इत्तर्थः ।

पिधानम्—"पिधानम्" इत्यव्ययपदम् । अत्र "भागुरि" नामकाचार्यमते अपीत्युपसर्गस्याऽकारस्य लोपे "अव्ययादाप्सुप." इमि सु लोपे च कृते पिधानम्' इति सिद्धं भवति । तदाह मूले—

वष्टि भागुरिरल्लोपमवाप्योरुपसर्जयोः ।
आपं चैव हलन्तानां यथा वाचा निशा दिशा ॥

इति सुवन्तप्रकरणं समाप्तम् ।

—✻—

शब्द रूप सग्रहः

"राम" शब्दः

	एकवचन	द्विवचन	बहुवचन
प्रथमा	रामः	रामौ	रामाः

द्वितीया	रामम्	रामौ	रामान्
तृतीया	रामेण	रामाभ्याम्	रामैः
चतुर्थी	रामाय	रामाभ्याम्	रामेभ्यः
पंचमी	रामात्-रामाद्	रामाभ्याम्	रामेभ्यः
षष्ठी	रामस्य	रामयोः	रामाणाम्
सप्तमी	रामे	रामयोः	रामेषु
सम्बोधन	हे राम	हे रामौ	हे रामाः

सूचना—एवमेव बालक, पालक, मुकुन्द, पाठक, अध्यापक, देव, दनुज, दैत्य, स्वाध्याय-अनुभाव, विभाव, भाव, दायभव, अभाव, सहाय, असहाय, प्रचय, विकाय, निश्चय, अनिश्चय, कंस, वसुदेव, कृष्ण, विहार, प्रहार, संहार, उपहार, नीहार, अनुहार, असार, प्रसार, संसार, प्रचार, आचार, व्यवहार, विचार, संचार, परिहार, भार, तुषार, झङ्कार, आकार, प्रकार, दुराचार, अत्याचार, व्यभिचार सदाचार, समाहार, आधार, आदर, वंश, आहार प्रभृतयः शब्दाः बोध्याः।

अकारान्तः पुल्लिङ्गः सर्वनाम संज्ञकः सर्वशब्दः (सव)

प्र०	सर्वः	सर्वौ	सर्वे
द्वि०	सर्वम्	"	सर्वान्
तृ०	सर्वेण	सर्वाभ्याम्	सर्वैः
च०	सर्वस्मै	सर्वाभ्याम्	सर्वेभ्यः
पं०	सर्वस्मात्-द्	"	"
ष०	सर्वस्य	सर्वयोः	सर्वेषाम्
स०	सर्वस्मिन्	सर्वयोः	सर्वेषु
सं०	हे सर्व	हे सर्वौ	हे सर्वे

एवम् विश्व, अन्य, इतर, सम, सिम, एक, अनेक, कतर, कतम प्रभृतय। सर्वनाम संज्ञकाः सेयाः।

निर्जर शब्दस्य रूपाणि (देव)

निर्जःर निर्जरसौ, निर्जरौ निर्जरसः, निर्जराः प्र०

निर्जरसम्, निर्जरम्	निर्जरसौ, निजरौ	निर्जरसः, निर्जरान्	दि०
निर्जरसो, निर्जरेण	निर्जराभ्याम्	निर्जरैः	तृ०
निर्जरसे, निर्जराय	,,	निर्जरेभ्यः	च०
निर्जरसः, निर्जरात्-द्	,,	,,	पं०
निर्जरसः, निर्जरस्य	निर्जरसोः, निर्जयोः	निर्जरसाम, निर्ज़राणाम्	
निर्जरसि, निर्जरे	,,	,, निर्जरेषु	स०
हे निर्जर	हे निर्जरसौ, निर्जरौ	हे निर्जरसः, निर्जराः	सं०

अकारान्तः पुंल्लिङ्ग विश्वपाशब्दः (संसार के पालन करनेवाले)

विश्वपाः	विश्वपौ	विश्वपाः	प्र०
विश्वपाम्	,,	विश्वपः	दि०
विश्वा	विश्वपाभ्याम्	विश्वपाभिः	तृ०
विश्वपे	,,	विश्वपाभ्यः	च०
विश्वपः	,,	,,	पं०
विश्वपः	विश्वपोः	विश्वपाम्	ष०
विश्वपि	,,	विश्वपासु	स०
हे विश्वपाः	हे विश्वपौ	हे विश्वपाः	सं०

इकारान्तः हरि शब्दः (भगवान्) ६८ ई०

हरिः	हरी	हरयः	प्र०
हरिम्	हरो	हरीन्	द्वि०
हरिणा	हरोभ्याम्	हरिभिः	तृ०
हरये	,,	हरिभ्यः	च०
हरेः	,,	,,	पं०
,,	हर्योः, ह्य्र्योः	हरीणाम्	ष०
हरौ	,,	हरिषु	स०
हे हरे	हे हरी	हे हरयः	सं०

सखि शब्दः (मित्र) ६५ ई०

सखा	सखायौ	सखायः	प्र०
सखायम्	,,	सखीन्	द्वि०

सख्या	सखिभ्याम्	सखिभिः	तृ०
सख्ये	”	सखिभ्यः	च०
सख्युः	”	”	पं०
”	सख्योः	सखीनाम्	षं०
सख्यौ	”	सखिषु	सं०
हे सखे	हे सखायौ	हे सखायः	सं०

पति शब्दः (मालिक)

पतिः	पती	पतयः	प्र०
पतिम्	”	पतीन्	द्वि०
पत्या	पतिभ्याम्	पतिभिः	तृ०
पत्ये	”	”	च०
पत्युः	”	”	प०
”	पत्योः	पतीनाम्	ष०
पत्यौ	”	पतिषु	स०
हे पते	हे पती	हे पतयः	सं०

उकारान्तः पुलिङ्गः शंभु शब्दः (भगवान् शङ्कर)

प्र०	शम्भुः	शम्भू	शम्भवः	प्रथम
द्वि०	शम्भुम	”	शम्भून्	द्वि०
तृ०	शम्भुना	शम्भुभ्याम्	शम्भुभिः	तृ०
च०	शम्भवे	”	शम्भुभ्यः	च०
पं०	शम्भोः	”	”	पं०
ष०	”	शम्भ्वोः	शम्भूनाम्	ष०
स०	शम्भौ	”	शम्भुषु	स०
सं०	हे शम्भ	हे शम्भू	हे शम्भव	सं०

क्रोष्टु शब्दः (गीदड़, सियार) ६५, ६९ ई०

क्रोष्टा	क्रोष्टारौ	क्रोष्टारः	प्रथम
क्रोष्टारम्	”	क्रोष्टून्	द्वितीया

क्रोष्ट्रा / क्रोष्टुना	क्रोष्टुभ्याम्	क्रोष्टुभिः	तृतीया
क्रोष्ट्रे / क्रोष्टवे	”	क्रोष्टुभ्यः	चतुर्थी
क्रोष्टुः / क्रोष्टोः	”	”	पंचमी
क्रोष्टुः / क्रोष्टोः	क्रोष्ट्रोः / क्रोष्ट्वोः	क्रोष्टूनाम्	षष्ठी
क्रोष्टरि / क्रोष्ट्री	क्रोष्ट्रोः / क्रोष्ट्वोः	क्रोष्टुषु	सप्तमी
हे क्रोष्टो	हे क्रोष्टारौ	हे क्रौष्टारः	सम्बोधन

ऋकारान्तः पुल्लिङ्गः पितृ शब्दः (पिता) ६८ ई०

पिता	पितरौ	पितरः	प्र
पितरम्	”	पितॄन्	द्वि
पित्रा	पितृभ्याम्	पितृभिः	तृ
पित्रे	”	पितृभ्यः	च
पितुः	”	”	पं
पितुः	पित्रोः	पितॄणाम्	ष
पितरि	पित्रोः	पितृषु	स
हे पितः	हे पितरौ	हे पितरः	सं

एवमेव धातृ, नप्तृ, भ्रातृ, नृ, कर्तृ, मातृ, होतृ, पोतृ प्रभृतयः शब्द चालनीयाः।

ओकारान्त पुल्लिङ्ग गो शब्दः (गाय)

गौः	गावौ	गावः
गाम्	”	गाः
गवा	गोभ्याम्	गोभिः
गवे	गोभ्याम्	गोभ्यः
गोः	”	”
गोः	गवोः	गवाम्

गवि	,,	गोषु	स०
हे गोः	हे गावौ	हे गावः	सं०

आकारान्तः स्त्रीलिङ्गः रामा शब्दः (लक्ष्मी)

रमा	रमे	रमाः	प्र०
रमाम्	,,	,,	द्वि०
रमया	रमाभ्याम्	रमाभिः	तृ०
रमायै	,,	रमाभ्यः	च०
रमायाः	,,	,,	पं०
,,	रमयोः	रमाणाम्	ष०
रमागाम्	,,	रमासु	स०
हे रमे	हे रमे	हे रमाः	सं०

आकारान्त स्त्रीलिङ्गः सर्वनामसंज्ञकः सर्वा शब्दः (सब)

सर्वा	सर्वे	सर्वाः	प्र०
सर्वाम्	,,	,,	द्वि०
सर्वया	सर्वाभ्याम्	सर्वाभिः	तृ०
सर्वस्यै	,,	सर्वाभ्यः	च०
सर्वस्याः	,,	,,	पं०
,,	सर्वयोः	सर्वासाम्	ष०
सर्वस्याम्	सर्वयोः	सर्वासु	स०
हे सर्वे	हे सर्वे	हे सर्वाः	सं०

त्रिशब्दस्य रूपाणि (तीन)

(त्रिशब्दो नित्यं वहुवचनान्तः)

पुंसि	स्त्रियाम्	नपुंसके
त्रयः	तिस्रः	त्रीणि
त्रीम्	तिस्रः	त्रीणि
त्रिभिः	तिसृभिः	त्रिभिः
त्रिभ्यः	तिसृभ्यः	त्रिभ्यः

त्रिभ्यः	त्रिसृभ्यः	त्रिभ्यः
त्रयाणाम्	तिसृणाम	त्रयाणाम्
त्रिषु	तिसृषु	त्रिषु
हे त्रयः	हे तिस्त्रः	हे त्रीणि

इकारान्तः स्त्रीलिङ्गो "मति" शब्दः (वुद्धि)

मतिः	मती	मतयः
मतिम्	"	मतीः
मत्या	मतिभ्याम्	मतिभिः
मत्यै, मतये	"	मतिभ्यः
मत्याः, मतेः	"	"
मत्याः, मतेः	मत्योः	मतीनाम्
मत्याम्ः, मतौ	"	मतिषु
हे मते	हे मती	हे मतयः

एवमेव, रीति, नीति, गीति, श्रुति, स्मृति, छवि, वुद्धि, गति, तृप्ति, वृत्ति, कीर्ति, सम्पत्ति, विपत्ति, क्षति, हानि, सन्तति, स्तुति, प्रसस्ति, जाति, ख्याति, ज्ञाति, वेदि इत्यादि-इकारान्त स्त्रीलिङ्ग शब्दानां समेषां रूपाणि वोघ्यानि।

ईकाराग्तः स्त्रीलिङ्गः "स्त्री" शब्दः (औरत)

स्त्री	स्त्रियौ	स्त्रियः
स्त्रियम्, स्त्रीम्	स्त्रियौ	स्त्रियः, स्त्रीः
स्त्रिया	स्त्रीभ्याम्	स्त्रीभि
स्त्रियै	स्त्रीभ्याम्	स्त्रीभ्यः
स्त्रियाः	स्त्रीभ्याम्	स्त्रीभ्यः
स्त्रियाः	स्त्रियोः	स्त्रीणाम्
स्त्रियांम्	स्त्रियोः	स्त्रीषु
हे स्त्रि	हे स्त्रियौ	हे स्त्रियः

अकारान्तो नपुंसको ज्ञान शब्दः (वुद्धि)

ज्ञानम्	ज्ञाने	ज्ञानानि
"	"	"

ज्ञानेन	ज्ञानाभ्याम्	ज्ञानैः	तृ०
ज्ञानाय	”	ज्ञानेभ्यः	च०
ज्ञानात् द्	ज्ञानाभ्याम्	ज्ञानेभ्यः	पं०
ज्ञानस्य	ज्ञानयोः	ज्ञानानाम्	ष०
ज्ञाने	ज्ञानयोः	ज्ञानेषु	स०
हे ज्ञान	हे ज्ञाने	हे ज्ञानानि	सं०

एवमेव, धन, वन, फल, मुख, सुख, दुःख, वचन, नयन, नमन, जनन, ग्रहण, वर्जन, धारण, गमन प्रभृति शब्दानां रूपाणि ।

अकारान्तः सर्वनामनपुंसकः सर्व शब्दः (सब)

सर्वम्	सर्वे	सर्वाणि	प्र०
”	”	”	द्वि०
सर्वेण	सर्वाभ्याम्	सर्वैः	तृ०
सर्वस्मै	”	सर्वेभ्यः	च०
सर्वस्यात्-द्	”	”	पं०
सर्वस्य	सर्वयोः	सर्वेषाम्	ष०
सर्वस्मिन्	”	सर्वेषु	स०
हे सर्व	हे सर्वे	हे सर्वाणि	सं०

इकारान्तो नपुंसकलिङ्गो 'वारि' शब्दः (जल)

वारि	वारिणी	वारीणि	प्र०
”	”	”	द्वि०
वारिणा	वारिभ्याम्	वारिभिः	तृ०
वारिणे	”	वारिभ्यः	च०
वारिणः	वारिभ्याम्	वारिभ्यः	पं०
वारिणः	वारिणोः	वारीणाम्	ष०
वारिणि	वारिणोः	वारिषु	स०
हे वारे, हे वारि	हे वारिणी	हे वारीणि	सं०

हकारान्तः पुंलिङ्गो अनडुह-शब्दः (बैल)

अनड्वान्	अनड्वाहौ	अनड्वाहः	प्र०
अनड्वाहम्	,,	अनडुहः	द्वि०
अनडुहा	अनडुद्भ्याम्	अनडुद्भिः	तृ०
अनडुहे	,,	अनडुद्भ्यः	च०
अनडुहः	,,	,,	पं०
,,	अनडुहोः	अनडुहाम्	ष०
अनडुहि	,,	अनडुत्सु	स०
हे अनड्वन्	हे अनड्वाहौ	हे अनड्वाहः	सं०

त्रिषु लिङ्गेषु मकारान्तः "किम्" शब्दः (कौन) पुल्लिङ्ग —

कः	कौ	के	प्र०
कम्	कौ	काम्	द्वि०
केन	काभ्याम्	कैः	तृ०
कस्मै	काभ्याम्	केभ्यः	च०
कस्मात्	काभ्याम्	केभ्यः	पं०
कस्य	कयोः	केषाम्	ष०
कस्मिन्	कयोः	केषु	स०

(त्यदादेः सम्बोधनम् स्वभावतः एव न भवति । त्यद्—तद्-यत्- एतद्-इदम्-अदस-एक-द्वि-युस्मद्-अस्मद्-भवतु-किम् एते त्यादयः । एतेषां सम्बोधनाभावः)

स्त्रीलिङ्ग

का	के	काः	प्र०
काम	के	काः	द्वि०
कया	काभ्याम्	काभिः	तृ०
कस्यै	काभ्याम्	काभ्यः	च०
कस्याः	काभ्याम्	काभ्यः	पं०
कस्याः	कयोः	कासाम्	ष०
कस्याम	कयोः	कासु	स०

नपुंसके—

किम्	के	कानि	प्र०
किम्	के	कानि	द्वि०
केन	काभ्याम्	कैः	तृ०
कस्मै	काभ्याम्	केभ्यः	च०
कस्मात्	काभ्यांम्	केभ्यः	पं०
कस्य	कयोः	केषाम्	ष०
कस्मिन्	कयोः	केषु	स०

मकारान्तः इदम शब्दः (यह) पुल्लिङ्गे—

अयम्	इमौ	इमे	प्र०
इयम्	इमौ	इमान्	द्वि०
अनेन्	आभ्याम्	एभिः	तृ०
अस्यै	आभ्याम्	एभ्यः	च०
अस्मात्	आभ्याम्	एभ्यः	पं०
अस्य	अनयोः	एषाम्	ष०
अस्मिन्	अनयोः	एषु	स०

स्त्रीलिङ्गे—

इयम	इमे	इमाः	प्र०
इमाम	इमे	इमाः	द्वि०
अनया	आभ्याम्	आभिः	तृ०
अस्यै	आभ्याम्	आभ्यः	च०
अस्याः	आभ्याम्	आभ्यः	पं०
अस्याः	अनयोः	आसाम्	ष०
अस्याम्	अनयोः	आसु	स०

नपुंसके—

इदम	इमे	इमानि	प्र०
इदम	इमे	इमानि	द्वि०

(शेषं पुम्मत्)

त्रिपुलिङ्गेषु दकारान्तः तद् शब्दः (वह) पुल्लिङ्गे—

सः	तौ	ते	प्रथम
तम	तौ	तान्	द्वितीय
तेन	ताभ्याम्	तैः	तृतीय
तस्मै	ताभ्याम्	तेभ्यः	चतुर्थ
तस्मात्	ताभ्याम्	तेभ्यः	पञ्चम
तस्य	तयोः	तेषाम्	षष्ठम्
तस्मिष्	तयोः	तेषु	सप्तम

स्त्रीलिङ्गे—

सा	ते	ताः	प्रथम
ताम	ते	ताः	द्वितीय
तया	ताभ्याम्	ताभिः	तृतीय
तस्यै	ताभ्याम्	ताभ्यः	चतुर्थ
तस्याः	ताभ्याम्	ताभ्यः	पञ्चम
तस्याः	तयोः	तेषाम्	षष्ठम
तस्याम्	तयोः	तासु	सप्तम्

नपुंसके—

तत्	ते	तानि
तत्	ते	तानि

(शेषं प्रंवत्)

त्रिपु लिङ्गेषु दकारान्तः यद् शब्दः (जो) पुल्लिङ्गे—

यः	यौ	ये	प्र०
यम्	यौ	यान्	द्वि०
येन	याभ्याम्	यैः	तृ०
यस्मै	याभ्याम्	येभ्यः	च०
यस्मात्	याभ्याम्	येभ्यः	प०
यस्य	ययोः	येषाम्	ष०
यस्मिन्	ययोः	येषु	स०

स्त्रीलिङ्गे—

ये	याः	प्र०
य	याः	द्वि०
याभ्याम्	याभिः	तृ०
याभ्याम्	याभ्यः	च०
याभ्याम	याभ्यः	पं०
ययोः	यासाम्	ष०
ययोः	यासु	स०

नपुंसके—

ये	यानि	प्र०
ये	यानि	द्वि०
याभ्याम्	यैः	तृ०
याभ्याम्	येभ्यः	च०
याभ्याम्	येभ्यः	पं०
ययोः	येषाम्	ष०
ययोः	येषु	स०

नकारान्त पुंल्लिङ्गः राजन् शब्दः (राजा)

राजानौ	राजानः	प्र०
"	राज्ञः	द्वि०
राजभ्याम्	राजभिः	तृ०
"	राजभ्यः	च०
"	"	पं०
राज्ञोः	राज्ञाम्	ष०
"	राजसु	स०
हे राजानौ	हे राजानः	सं०

'मघवन्' शब्दस्य रूपाणि (इन्द्र) ६५ ई०

तृत्वादेशपक्षे—

मघवन्तौ	मघवन्तः	प्र०

मघवन्तम्	"	मघवतः
मघवता	मघवद्भ्याम्	मघवद्भिः
मघवते	"	मघवद्भ्यः
मघवतः	"	"
मघवतः	मघवतोः	मघवताम्
मघवति	मघवतोः	मघवत्सु

तृत्वाभावपक्षे—

मघवा	मघवानौ	मघवानः
मघवानम्	मघवानौ	मघोनः
मघोना	मघवभ्याम्	मघवभिः
मघोने	मघवभ्याम्	मघवभ्यः
मघोनः	मघवभ्याम्	मघवभ्यः
मघोनः	मघोनोः	मघोनाम्
मघोनि	मघोनोः	मघवत्सु
हे मघवन्	हे मघवनौ	हे मघवानः

नकारान्तः पुल्लिङ्गः पथिन् शब्दः (मार्ग)

पन्थाः	पन्थानौ	पन्थानः
पन्थानम्	पन्थानौ	पथः
पथा	पथिभ्याम्	पथिभिः
पथे	पथिभ्याम्	पथिभ्यः
पथः	पथिभ्याम्	पथिभ्यः
पथः	पथोः	पथाम्
पथि	पथोः	पथिषु
हे पन्थाः	हे पन्थानौ	हे पन्थानः

जान्तः पुल्लिङ्गः परिव्राज् शब्दः (सन्यासी—विरक्त)

परिव्राट्, ड्	परिव्राजौ	परिव्राजः
परिव्राजम्	परिव्राजौ	परिव्राजः
परिव्राजा	परिव्राड्भ्याम्	परिव्राड्भिः

परिव्राजे	परिव्राड्भ्याम्	परिव्राड्भ्यः	च०
परिव्राजः	परिव्राड्भ्याम्	परिव्राड्भ्यः	पं०
परिव्राजः	परिव्राजोः	परिव्राजाम्	ष०
परिव्राजि	परिव्राजोः	परिव्राट्त्सु, परिव्राट्सु	स०
हे परिव्राट्, हे परिव्राड्	हे परिव्राजौ	हे परिव्राजः	स०

त्रिषुलिङ्गेषु समानो दकारान्तः 'युष्मद' शब्दः (तुम) ६८ ई०

त्वम्	युवाम्	यूयम्	प्र०
त्वाम	युवाम्	युष्मान्	द्वि०
त्वया	युवाभ्याम्	युष्माभिः	तृ०
तुभ्यम् (ते)	युवाभ्याम्	युष्मभ्यम्	च०
त्वत्, द	युवाभ्याम्	युष्मत्	पं०
तव (ते)	युवयोः	युष्माकम्	ष०
त्वयि	युवयोः	युष्मासु	स०

दकारान्त त्रिषुलिङ्गेषु सरूपः सर्वनामा अस्मद् शब्दः (मैं) ६९ ई०

अहम्	आवाम्	वयम्	प्र०
माम (मा)	आवाम् (नौ)	अस्मान् (नः)	द्वि०
मया	आवाभ्याम्	अस्माभिः	तृ०
मह्यम् (मे)	आवाभ्याम् (नौ)	अस्मभ्यम् (नः)	च०
मत्, द्	आवाभ्याम्	अस्मत्	पं०
मम	आवयोः	अस्माकम्	ष०
मयि	आवयोः	अस्मासु	स०

तकारान्तः पुल्लिङ्गो महच्छब्दः (बड़ा, श्रेष्ठ)

महान्	महान्तौ	महान्तः	प्र०
महान्तम्	महान्तौ	महतः	द्वि०
महता	महद्भ्याम्	महद्भिः	तृ०
महते	महद्भ्याम्	महद्भ्यः	च०
महतः	महद्भ्याम्	महद्भ्यः	पं०
महतः	महतोः	महताम्	ष०

महति	महतोः	महत्सु
हे महान्	हे महान्तौ	हे महान्तः

तकारान्तो भवत् शब्दः (आप)

भवान्	भवन्तौ	भवन्तः
भवन्तम्	भवन्तौ	भवतः
भवता	भवद्भ्याम्	भवद्भिः
भवते	भवद्भ्याम्	भवद्भ्यः
भवतः	भवद्भ्याम्	भवद्भ्यः
भवतः	भवतोः	भवताम्
भवति	भवतोः	भवत्सु
हे भवन्	हे भवन्तौ	हे भवन्तः

सकारान्तः पुंल्लिङ्गः विद्वस् शब्दः (ज्ञानवाला)

विद्वान्	विद्वांसौ	विदुषः
विद्वांसम्	विद्वांसौ	विदुषः
विदुषा	विद्वद्भ्याम्	विद्वद्भिः
विदुषे	विद्वद्भ्याम्	विद्वद्भ्यः
विदुषः	विद्वद्भ्याम्	विद्वद्भ्यः
विदुषः	विदुषोः	विदुषाम्
विदुषि	विदुषोः	विद्वत्सु
हे विद्वन्	हे विद्वांसौ	हे विद्वांसः

'अदस्' शब्दस्य त्रिषु लिङ्गेषु रूपाणि (यह) ३४ ई०

पुंल्लिङ्गे—

असौ	अमू	अमी
अमुम्	अमू	अमून्
अमुना	अमूभ्याम्	अमीभिः
अमुष्मै	अमूभ्याम्	अमीभ्यः
अमुष्मात्	अमूभ्याम्	अमीभ्यः
अमुष्य	अमुयोः	अमीषाम्

अमुष्मिन्	अमुयोः	अमीषु	स०

[व्यदादेः सम्बोधनं नास्ति]

स्त्रीलिङ्गे—

असौ	अमू	अमूः	प्र०
अमुम्	अमू	अमूः	द्वि०
अमुया	अमूभ्याम्	अमूभिः	तृ०
अमुष्यै	अमूभ्याम्	अमूभ्यः	च०
अमुष्याः	अमूभ्याम्	अमूभ्यः	पं०
अमूष्याः	अमुयोः	अमूषाम्	ष०
अमूष्याम्	अमुयोः	अमूषु	स०

नपुंसके—

अदः	अमू	अमूनि	प्र०
अदः	अमू	अमूनि	द्वि०
अमुना	अमूभ्याम्	अमीभिः	तृ०
अमुष्मै	अमूभ्याम्	अमीभ्यः	च०
अमुष्मात्	अमूभ्याम्	अमीभ्यः	पं०
अमुष्य	अमुयोः	अमीषाम्	ष०
अमुष्मिन्	अमुयोः	अमीषु	स०

रेफान्तः स्त्रीलिङ्गः गिर शब्दः (वचन)

गीः	गिरौ	गिरः	
गिरम्	गिरौ	गिरः	प्र०
गिरा	गीर्भ्याम्	गीर्भिः	द्वि०
गिरे	गीर्भ्याम्	गीर्भ्यः	तृ०
गिरः	गीर्भ्याम्	गीर्भ्यः	च०
गिरः	गिरोः	गिराम्	पं०
गिरि	गिरोः	गीर्षु	ष०
हे गीः	हे गिरौ	हे गिरः	सं०

त्रिपु लिङ्गेषु नित्यं बहुवचनान्तः 'चतुर' शब्दः (चार)

पुंल्लिङ्गे स्त्रीलिङ्गे नपुंसके

चत्वारः	चतस्रः	चत्वारि
चतुरः	चतस्रः	चत्वारि
चतुर्भिः	चतसृभिः	चतुर्भिः
चतुर्भ्यः	चतसृभ्यः	चतुर्भ्यः
चतुर्भ्यां	चतसृभ्यः	चतुर्भ्यः
चतुर्णाम्	चतसृणाम्	चतुर्णाम्
चतुर्षु	चतसृषु	चतुर्षु
हे चत्वारः	हे चतस्रः	हे चत्वारि

सकारान्तः क्लीवः पयस् शब्दः (दूध या पानी)

पयः	पयसी	पयांसि
पयः	पयसी	पयांसि
पयसा	पयोभ्याम्	पयोभिः
पयसे	पयोभ्याम्	पयोभ्यः
पयसः	पयसः	पयोभ्यः
पयसः	पयसोः	पयसाम्
पयसि	पयसोः	पयस्सु पयःसु
हे पयः	हे पयसी	हे पयांसि

षान्तो नपुंसकलिङ्गो 'धनुष्' शब्दः (धनुष)

धनुः	धनुषी	धनूंषि
धनुः	धनुषीः	धनूंषि
धनुषा	धनुर्भ्याम्	धनुर्भिः
धनुषे	धनुर्भ्याम्	धनुर्भ्यः
धनुषः	धनुर्भ्याम्	धनुर्भ्यः
धनुषः	धनुषोः	धनुषाम्
धनुषि	धनुषोः	धनुष्षु-धनुः सु
हे धनुः	हे धनुषी	हे धनूंषि

दीक्षित प्रिंटिंग प्रेस, हाथरस ।

